VAV-06

मुक्तस्वाध्यायपीठम्
(Institute of Distance Education)
राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः)

व्याकरणशास्त्रीयेतिहासः

नव्यव्याकरणाम्, आचार्यसेतुः,
षष्ठपत्रम्

खण्डः

३

खण्डपरिचयः

स्वागतमत्र भवतः पञ्चमत्रस्य व्याकरणशास्त्रीयेतिहासभागस्य तृतीये खण्डे । अस्मिन् खण्डे आहत्य पञ्च पाठाः भवन्ति । तत्र दशमपाठस्य लेखकः डा. यदुवीरस्वरूप-ब्रह्मचारी वर्तते । एकादशस्य पाठस्य च लेखकः डा. विनायकरजतभट्टमहोदयोऽस्ति । द्वादशस्य पाठस्य आलेखकः शेषमणिशुक्लो विद्यते। अथ च त्रयोदशस्य पाठस्य चतुर्दशस्य च लेखकः श्रीधरनाथद्विवेदी महोदयो भवति ।

तत्र **दशमे पाठे** 'व्याकरणस्य दार्शनिकग्रन्थकाराः' इत्यस्ति विषयः । अत्र स्फोटायनमारभ्य येऽपि दार्शनिकग्रन्थकाराः वैयाकरणाः भवन्ति तेषां सर्वेषां विवरणं विद्यते। तत्र च औदुम्बरायणः, व्याडिः, पतञ्जलिः, भर्तृहरिः, कौण्डभट्टः, भट्टोजिदीक्षितः, नागेशभ्ट्ट इत्येवामदयो महावैयाकरणाः आचार्याः व्याख्याताः सन्ति।

एकादशे पाठे प्रातिशाख्यविषये व्याख्यानमस्ति। तत्र च प्रतिवेदं प्रातिशाख्यं भवतीति विलिख्य तेषां सर्वेषां विषये संक्षिप्ततया परिचयादिकं लिखितमस्ति ।

द्वादशे पाठे च पाणिन्युत्तरवर्तिनः शब्दानुशासनकर्तारः' इति विषयोपरि व्याख्यानमस्ति। अत्र च कातन्त्रव्याकरणम्, चान्द्रव्याकरणम्, इत्यादिव्याकरणादारभ्य सुपद्मव्याकरणं यावत् ये व्याख्यातारः सन्ति तेषां सर्वेषां विषये भणितमस्ति ।

त्रयोदशे पाठे च 'व्याकरणस्य खिलपाठमाश्रित्य' विचारः प्रस्तुतः । तत्र खिलशब्दार्थमुपवर्ण्य धातुपाठगणपाठोणादिपाठलिङ्गानुशासनपाठकर्तारः ये सन्ति तेषां विषये लिखितमस्ति । अथ च फिट्सूत्रकारपरिभाषापाठकारविषयेऽपि सर्वमैतिहासिकं तथ्यं लिखितमस्ति।

चतुर्दशे पाठे च 'प्रकीर्णविषयाः' भवन्ति । अत्र च लक्ष्यप्रधानकाव्यानां तल्लेखकानां च विषये सर्वं समीचीनतया विलिख्य, निरूक्तस्य ऐतिहासिकः परिचयः प्रदत्तः। अत्रैव च शिक्षाग्रन्थस्य, अथ च पाणिनिव्याकरणस्य अध्ययनपरम्परायाः विषयेऽपि पर्याप्तः विचारः समुपस्थापितः।

दशमः पाठः – व्याकरणस्य दार्शनिकग्रन्थकाराः

पाठसंरचना

१०.१ प्रस्तावना

इतः पूर्वं भवान् महाभाष्यविषये तट्टीकाकाराणां विषये च पठितवान् । तस्मिन्नेव क्रमे अत्र पाठे व्याकरणस्य दार्शनिकग्रन्थाः तत्कर्तारश्च के इति विषये भवान् पठिष्यति । व्याकरणशास्त्रस्य दर्शनत्वं कथं वर्तते? प्रमुखरूपेण व्याकरणस्य दार्शनिकाः के सन्ति तेषां जीवनकालदिविषये पठिष्यति । अत्रैवं ज्ञेयं यत् व्याकरणं यथा प्रक्रियावबोधकं भवति, तथैव दार्शनिकतत्त्वानपि बोधयति। अन्ततः वग्वै ब्रह्म इति सिद्धान्तः स्थितो भवति। अत्र भवान् वाग्ब्रह्मचिन्तकानां, स्फोटचिन्तकानां वा विषये विशेषेण पठिष्यति ।

१०.२ उद्देश्यम्

एनं पाठं पठित्वा भवान् –

1. दर्शनं किमिति बोद्धुं समर्थो भविष्यति ।

2. दार्शनिकाः वैयाकरणाः के भवन्ति इति ज्ञातुं योग्या?: भविष्यति ।

3. व्याकरणस्य दार्शनिकग्रन्थाः के इत्यपि अवगमिष्यति ।

4. सर्वेषां दार्शनिकानां परिचयं प्राप्स्यति ।

१०.३ व्याकरणस्य दार्शनिकग्रन्थाः, ग्रन्थकाराश्च-

व्याकरणशास्त्रस्य द्विविधः पक्षो भवति। प्रक्रियापक्षः दार्शनिकपक्षश्च। व्याकरणं यथा प्रक्रियावबोधकं भवति, तथैव दार्शनिकतत्त्वमपि बोधयति। तत्र प्रक्रियापक्षपोषकाः काशिका-सिद्धान्तकौमुद्यादयो ग्रन्थाः भवन्ति। दार्शनिकपक्षपोषकाश्च वैयाकरणभूषणसार-वैयाकरणसिद्धान्तमंजूषावाक्यपदीयादयः भवन्ति। महाभाष्यं तत्र आकरग्रन्थः भवति। दार्शनिकपक्षे च अन्ततः वग्वै ब्रह्म इति सिद्धान्तः स्थितो भवति।

- **दार्शनिकपदार्थः**

दृश्यते आत्मतत्त्वावगोधकं तत्त्वं बोध्यतेऽनेन इति दर्शनम् । दर्शनम् अधीते वेत्ति वा इत्यर्थे ठकि, तस्य इकादेशे आदिवृद्धौ च कृते दार्शनिकः इति पदं सिध्यति । अर्थात् दर्शनं यः जानाति सः दार्शनिकः। अथवा यः दर्शनं पठति सोऽपि दार्शनिकः इति । अनया दर्शनम् अधिकृत्य कृतो ग्रन्थः दार्शनिकग्रन्थः। एवं तर्हि व्याकरणे कीदृशं दर्शनं वर्तते? इत्यत्र विचार्यते। वस्तुतस्तु व्याकरणं शब्दसाधुत्वविषयकशास्त्रं तु भवति । यदा च भाषायां प्रयुज्यमानानां पदानां प्रयोगकारणां चिन्तनं, पदार्थचिन्तनं तत्सामर्थ्यचिन्तनञ्च क्रियते, तदा तु व्याकरणशास्त्रं हि दर्शनशास्त्रस्य रूपमपि गृह्णाति । तस्य हि प्रथमे स्वरूपे प्रकृतिप्रत्ययविभागेन शब्दाः व्याक्रियन्ते । द्वितीये तु भाषोद्भवः, शब्दाभिव्यक्तिः, शब्दस्य स्वरूपम्, (स्फोटात्मकं ध्वन्यात्मकञ्च) अपभ्रंशस्य कारणानि, पदवाक्यविवेकः, धातुलकारादिज्ञानं, प्रातिपदिक-सुब्निपाताद्यर्थविवेकः, समासशक्तिः, शब्दशक्तिः, स्फोटः, क्रिया, कालः, लिङ्गानि, संख्या, उपग्रहश्चेत्यादयः विविच्यन्ते प्राधान्येन यत्र तद् दर्शनपदभाग् भवति। व्याकरणशास्त्रे दार्शनिकविवेकस्योद्भवः कदा प्रभृति प्रचलति इति निश्चयेन न शक्यते वक्तुम्। यास्काचार्यस्य निरुक्ते शब्दनित्यत्वविषयिणी चर्चा दृश्यते । अतः वक्तुं शक्यते यत् यास्ककालात् तु दार्शनिकधारा अवगतेति । वस्तुतः आचार्यः पाणिनिः 'अवङ् स्फोटायनस्य' इति सूत्रं लिखति । हरदत्तश्च ब्रूते स्फोटसिद्धन्तप्रतिपादकः ऋषिः स्फोटायनः। तेन ज्ञायते यत् यास्कात् पाणिनेश्च बहुपूर्वकालात् व्याकरणशास्त्रस्य दार्शनिकपक्षचिन्तनम् आसीत् । अथ च यदा भट्टोजिदीक्षित-कौण्डभट्ट-नागेश-प्रभृतयो विद्वांस आगता तदा एष पक्षोऽपि परां वृद्धिं गतः । भर्तृहरिस्तु सम्पूर्णेऽपि वाक्यपदीयग्रन्थे दार्शनिकसिद्धान्तमेव प्रतिपादयति इति । अत्र क्रमेण सर्वेषां दार्शनिकानां परिचयः दीयते ।

१०.३.१ स्फोटायनः

अयं स्फोटायनः पाणिनेः पूर्ववर्ती व्याकरणः अस्ति । अस्य स्फोटायनस्य स्मरणं भगवान् पाणिनिः स्वीये अष्टाध्यायीग्रन्थे कृतवान् । तन्नाम्ना एकं सूत्रं लिखितं तच्च 'अवङ्स्फोटायनस्य' इति वर्तते । स्फोटायनस्य विषये पदमञ्जरीकारः हरदत्तः काशिकायाः 'अवङ् स्फोटायनस्य' 6/1/123 इति सूत्रप्रपञ्चावसरे इत्थं व्याख्यातवान्- ''स्फोटोऽयनं परायणं यस्य स स्फोटायनः । स्फोटप्रतिपादनपरो वैयाकरणाचार्यः'' अनेन व्याख्यानेन ज्ञायते यत् वैयाकरणसम्मतस्फोटवादः प्रथमतया स्फोटायनाचार्येण एव अधिगतः इति । स्फोटायनस्य कालः कः इति विषये किमपि स्पष्टं प्रमाणं नोपलभ्यते। तथापि इतिहासविज्ञैः अस्य कालः 3200 विक्रमसंवत्सरात् पूर्वमनुमीयते । अत्र विषये अनुमानाकारः एवं वर्तते-

भारद्वाजमुनिकृतविमानशास्त्रस्य बौधायनवृत्तौ स्फोटायनस्य नामोल्लेखः दृश्यते। तत्र हि ''तत्र तावच्छौनकसूत्रम्........ चित्रिण्येवेति स्फोटायनः'' । अस्य व्याख्याने बौधायनवृत्तौ लिखितम् ''तदुक्तं शक्तिसर्वस्वे- वैमानिकगतिवैचित्र्याद्द्वात्रिंशत्क्रियायोगे एकैव चित्रिणिशक्त्यलमिति शास्त्रे निर्णीतं भवति इत्यनुभवतः शास्त्राच्च मन्यते स्फोटायनाचार्यः'' ।

अनेन उद्धरणेन ज्ञायते यत् स्फोटायनाचार्यः न केवलं पाणिनेः पूर्ववर्ती अपितु शौनकादितोऽपि पूर्ववर्तीति । अनेन ज्ञायते यत् स्फोटायनाचार्यो महान् वैमानिकोपि आसीत् । अतः वक्तुं शक्यते यद् स्फोटायनस्य कालः 3200 विक्रमसम्वत्सरात् पूर्वः अस्ति। इतोऽपि अस्य विषये अधिकं न लभ्यते । वस्तुतः स्फोटपदस्य व्युत्पत्तिः द्विधा विद्यते– स्फुटत्यर्थोऽस्मात् इति व्युत्पत्या अर्थप्रकाशकः शक्तिविशेषः। स्फुटते प्रकाशते इति स्फोटः– जगत्रूपम् । अथवा स्फुटति अग्रे प्रस्फुटति इति गतिविशेषः ।

१०.३.२ **औदुम्बरायणः**

अयं औदुम्बरायणः एव स्फोटवादस्य उपदेष्टा इति। एतच्च स्फोटसिद्धिकृतः भरतमिश्रस्य ग्रन्थेण ज्ञायते । तथाहि प्रोक्तं तेन ''भगवदौदुम्बरायणाद्युपदिष्टाखण्डभावम् अपि व्यञ्जनारोपितनान्तरीयकभेदक्रमविच्छेदादिनिविष्टैः परैः एकाकारनिर्भासम् अन्यथा सिद्धीकृत्य अर्थधीहेतुतां चान्यत्र संचार्य भगवदौदुम्बरादीनपि भगवदुपवर्षादिभिः निर्मायापालितम्...'' अयम् आचार्यः शब्दनित्यत्ववादीति युधिश्रिमहोदयैः प्रतिपादितम् । उदुम्बरस्य अपत्यम् इत्यर्थे नडादिगणे पठितत्वात् 'नडादिभ्यः फक्' 4/1/99 इति सूत्रेण फक्प्रत्यये तस्य चायनादेशे कृते सिध्यति औदुम्बरायणः इति शब्दः । अतः वक्तुं शक्यते यत् औदुम्बरायणस्य पितुः नाम उदुम्बरः आसीत् ।

- **औदुम्बरायणस्य कालः**

अस्य आचार्यस्य उल्लेखः निरुक्तकारेण यास्केन स्वग्रन्थे कृतः । यास्कस्य कालः 3100 विक्रमसंवत्सरात् पूर्व वर्तते। तस्मात् औदुम्बरायणस्य कालः 3100 विक्रमसम्वत्सरतः पूर्वः सम्भाव्यते। तथा चोक्तं यास्केन–निरुक्ते 'इन्द्रियनित्यं वचनमौदुम्बरायणः''। अतः अनुमीयते यदौदुम्बरायणः स्फोटमतव्याख्याता आसीत् । स हि स्फोटरूपं शब्दं नित्यं ध्वनिरूपञ्चानित्यं मन्यते स्म । एवञ्च औदुम्बरायणो वार्ताक्षाचार्यो हि शब्दनित्यत्वा–नित्यत्वविवेचकाविति । तथा चोक्तं भर्तृहरिणा–

वाक्यस्य बुद्धौ नित्यत्वमर्थयोगञ्च लौकिकम् । (शाश्वतम्)
दृष्ट्वा चतुष्ट्वं नास्तीति वार्ताक्षौदुम्बरायणौ ॥

इति वचनानुसारं औदुम्बरायणः शब्दनित्यत्त्ववादी आसीदिति गम्यते ।

१०.३.३ **व्याडिः**

संस्कृतव्याकरणपरम्परायां पाणिनिना हि प्रत्यक्षतः न किमपि मतं दर्शितम् । परन्तु सः हि शब्दस्य नित्यत्वमेव यथार्थतः अङ्गीकरोति । अत्र विषये व्याडिः दाक्षायणः प्रथमः संग्रहकारः इति ।

रसाचार्यः कविर्व्याडिः शब्दब्रह्मैकवाङ्मुनिः ।
दाक्षीपुत्रवचोव्याख्यापटुर्मीमांसकाग्रणी ॥

भगवान् कात्यायनो हि पाणिनिशब्दानुशासनोपरि वार्तिकानि कृतवान् । तयोरन्तराले हि व्याडिनामकः कश्चिद् विचक्षणो बभूव यो हि पाणिनिव्याकरणमधिकृत्य संग्रहग्रन्थं प्रणीतवान् । यद्यपि तस्य कृतिः सम्प्रति नैवोपलभ्यते । तथापि ग्रन्थान्तरे सा बहुत्र समुद्धृता दृश्यते । भरतनाट्यशास्त्रे संग्रहलक्षणविषयकं पद्यम्–

विस्तरेणोपदिष्टानामर्थानां सूत्रभाष्ययोः।
निबन्धो यः समासेन संग्रहं तं विदुर्बुधाः॥ इति

स च संग्रहः पाणिनीयशास्त्रमधिकृत्य कृतः आसीदिति विश्वस्यते । यथोक्तं महाभाष्यदीपिकायां भर्तृहरिणा– संग्रहोऽप्यस्यैव शास्त्रस्यैकदेशः ।

यथा च वाक्यपदीयटीकायां पुण्यराजः– इह पुरा पाणिनीयेऽस्मिन् व्याकरणे व्याड्युपरचितं लक्ष्यग्रन्थपरिमाणं संग्रहाभिधानं निबन्धमासीत् । इति । तथा च कृष्णचरिते समुद्रगुप्तः–

रसाचार्यः कविर्व्याडिः शब्दब्रह्मैकवाङ्मुनिः
दाक्षीपुत्रवचोव्याख्यापटुर्मीमांसकाग्रणी ॥

अस्य विषये भगवता भाष्यकारेणापि प्रोक्तम्– **''शोभना खलु दाक्षायणस्य संग्रहस्य कृतिः ।** संग्रहपदञ्च पाणिनिगणे पाठे पठितम् अस्ति । एवमेव नागेशेन उद्द्योते प्रोक्तम्– 'संग्रहो व्याडिकृतो लक्षसंख्यो ग्रन्थः'' इति । महाभाष्यकारसमये संग्रहाख्यः ग्रन्थः आसीत् इति भाष्यवचनेन ज्ञायते । तथाहि – संग्रहे तावत् प्राधान्येन परीक्षितम्, नित्यो वा स्यात् कार्यो वा स्यात् । तत्रोक्ताः दोषाः प्रयोजनान्यपि उक्तानि इति । भर्तृहरिः ब्रूते– चतुर्दश सहस्राणि वस्तूनि अस्मिन् संग्रहग्रन्थे परीक्षितानि सन्ति इति ।

व्याडेः विषये समग्रः परिचयस्तु नोपलभ्यते, तथापि व्याडिं पुरुषोत्तमदेवः स्वकीयत्रिकाण्डशेषे विन्ध्यस्थः, नन्दिनीसुतः, मेधावी इति त्रिभिः पर्यायैः परिचाययति। अयं व्याडिः ऋक्प्रतिशाख्ये बहुत्र, महाभाष्ये आपिशलपाणिनीयव्याडीयगौतमीयाः, 'द्रव्याभिधानं व्याडिः' इति महाभाष्ये काशिकावृत्तौ, इकां यण्भिर्व्यवधानं व्याडिगालवयोदिति वक्तव्यम्' इति भाषावृत्तौ च स्मृतः ।

♦ व्याडिशब्दस्य व्युत्पत्तिः–

सायणाचार्यानुसारेण व्याडिपदस्य व्युत्पत्तिः व्यडस्य अपत्यमिति । व्यडशब्दात् 'अत इञ्' इति सूत्रेण इञि प्रत्यये उपधावृद्धौ कृतायां व्याडिः 'स्वागतादीनाञ्च' इति वृद्धिप्रतिषेधैजागमयोः निषेधः इति ।

♦ व्याडिनामका अनेके आचार्याः

व्याडिनामकाः बहवः आचार्याः आसन् । तत्र कः प्राचीनः कश्चार्वाचीनः इति ज्ञातुं क्लेशकरमेव । ऋक्प्रातिशाख्ये स्मृतः व्याडिः, संग्रहकारो व्याडिः रसशास्त्रज्ञो वा इति न ज्ञायते? तत्र एकः व्याडिः पाणिनिपूर्ववर्ती ऋक् प्रातिशाख्यादिषु स्मृतः । एकश्च व्याडिः पाणिनिसमकालिकः कोशकारः । एकश्च व्याडिः पाणिन्यपरवर्ती पाणिनीयशब्दानुशासनस्य द्वितीयो वृत्तिकारः । एकश्च व्याडिः प्रकरणगतः संग्रहकारः। अयञ्च किंदेशिकः किं कालिकः इति साधुतया न ज्ञायते । तथापि अस्य कालं युधिश्ररमीमांसकः 2950 विक्रमसम्वत्पूर्वं प्रतिपादयति ।

♦ व्याडिकृत-संग्रह-ग्रन्थस्य परिचयः–

व्याडिना 'संग्रहः' नाम्ना व्याकरणस्य एकः दार्शनिकग्रन्थः प्रणीतः । स च ग्रन्थः शोभनः आसीत् । उक्तञ्च तद्विषये महाभाष्ये पतञ्जलिना ''शोभना खलु दाक्षायणस्य संग्रहस्य कृतिः'' इति । संग्रहश्च पञ्चसु अध्यायेषु विभक्त आसीदिति । अतः 'पञ्चकः संग्रह' इति व्यवहारः । 'अष्टकं पाणिनीयम्' इति चान्द्रव्याकरणस्य वृत्तौ कथनेन ज्ञायते । स च लक्षश्लोकात्मकः आसीत् इति । ''संग्रहो व्याडिकृतो लक्षश्लोकसंख्यो ग्रन्थः इति प्रसिद्धः'' इति नागेशभट्टेन प्रोक्तम् । अयं ग्रन्थः सूत्रात्मकः अवर्तत इति 'सांग्रहसूत्रिकः' इति महाभाष्यवचनात् ज्ञायते । अयं ग्रन्थः प्राधान्येन व्याकरणदर्शनसम्बद्धः आसीत् ।

संग्रहग्रन्थे चतुर्दश सहस्राणि वस्तूनि परीक्षितानि आसन्निति 'संग्रहे तावत् प्राधान्येन परीक्षितम्' इति महाभाष्यकथनस्य चतुर्दशसहस्राणि वस्तूनि अस्मिन् संग्रहग्रन्थे परीक्षितानि' इति भर्तृहरिकृतया व्याख्यया ज्ञायते । तथा सति लक्षश्लोकवत्वं सिध्यति । ग्रन्थस्यास्य प्रतिश तदा सर्वोत्कृष्टा आसीत् । जनाश्च तदा आत्मानं दाक्षिव्याकरणदक्ष इति कथने गौरवमनुभवन्ति स्म । काशिकायां कुमारीदाक्षा: संग्रहस्यास्य सर्वोत्कृष्टत्वं द्योतयति। अधोलिखितेन महाभाष्योद्धृतवचनेनापि महत्त्वं बोध्यते।

किरति चर्करीतान्तं पचतीत्यत्र यो नयेत् ।
प्राप्तिज्ञं तमहं वन्दे प्रारब्धस्तेन संग्रहः ॥ इति।

संग्रहस्य महत्त्वम् उद्घोषयन् भर्तृहरि: कथयति–

प्रायेण संक्षेपरुचीनल्पविद्या परिग्रहान्
सम्प्राप्य वैयाकरणान् संग्रहेऽस्तमुपागते ।
कृतेऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना ।
सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने ।

अर्थात् – संक्षेपरुचीन् वैयाकरणान् संप्राप्य संग्रहग्रन्थ: अस्तंगत:। संग्रहे तावत् सर्वं वेशद्येन आसीत्।

♦ व्याडिकृता: ग्रन्था:–

दशाध्यायात्मकं व्याकरणशास्त्रम्, बालचरितं नाम महाकाव्यम्, परिभाषाया:, लिङ्गानुशासनम्, विकृतवल्ली, (ऋक्परिशिष्टम्)

♦ व्याडे: दार्शनिकत्वम्–

संग्रहग्रन्थस्य अप्राप्तौ सत्यां व्याडे: दर्शनस्य सम्यग् व्याख्या तु नैव सम्भवति तथापि प्राप्तोद्धरणतो ज्ञायते यद् व्याडिरपि स्फोटात्मकं शब्दं नित्यं, ध्वन्यात्मकं शब्दं त्वनित्यं मन्यते स्म । स हि अन्विताभिधानवादिवत्पदार्थहेतुत्वेन वाक्यार्थमेव गृह्णाति। तन्मते नित्यो हि शब्दोऽनित्येन ध्वनिनोच्चार्यते तेन परावस्थायां स्थित: शब्दो नित्य:। तत: पश्यन्त्यवस्थातोऽनित्य: नित्योऽपि शब्द: प्रकृतिप्रत्ययविभागेन व्याक्रियते इति। एवं प्रकारेण भवान् ज्ञातुमर्हति यत् व्याडि: महान् दार्शनिक: आसीत् । तेषां संग्रहे – प्राय: सर्वे दार्शनिकविषया: संग्रहीता: आसन्, तदर्थमेव भाष्ये उक्तं– सर्ववेद पारिषदं हीदं शास्त्रं तत्र नैक: पन्था: शक्य: आस्थातुमिति।

१०.३.४ पतञ्जलि:–

शेषावतारेण भगवता पतञ्जलिना अष्टाध्यायीस्थसूत्राणि, वार्तिकानि च स्वीकृत्य महाभाष्यं प्रणीतम् । यद्यपि ग्रन्थमिमं दृष्ट्वा आपातत: केवलं पाणिनीयाष्टाध्यायीव्याख्यानं प्रतीयते । तथापि भाष्यस्य एतावदेव स्वरूपं नास्ति । नहि तावत् शब्दानुशासनमात्रम्, अपितु प्राचीनव्याकरणसम्प्रदायस्य आकरग्रन्थ: वर्तते । व्याकरणदर्शनस्य समस्ता: न्याया:– अत्र यत्र–तत्र विद्यमाना: सन्ति । अत एव भर्तृहरिणा प्रोक्तम्–

कृतेऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना ।
सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने ॥ इति

एतस्य व्याख्यानं कुर्वता पुण्यराजेन लिखितम्– ''तच्च भाष्यं न केवलं

व्याकरणस्य निबन्धनं, यावत् सर्वेषां न्यायबीजानां बोद्धव्यम् इत्यतः एव सर्वन्यायबीजहेतुत्वादेव महच्छब्देन विशेष्यं महाभाष्यम् इति उच्यते लोके । किञ्च ''आर्षे विप्लाविते ग्रन्थे संग्रहप्रतिकञ्चुके'' इति वदता भर्तृहरिणा महाभाष्यस्य कृते 'संग्रहप्रतिकञ्चुकम्' इति पदस्य व्यवहारः कृतः । अनेन स्पष्टमिदं यद् व्याडिकृतसंग्रहवदेव शब्दशास्त्रस्य दार्शनिक ग्रन्थोऽस्ति । भर्तृहरिविरचितस्य वाक्यपदीयस्य महाभाष्यमेव आधारग्रन्थो वर्तते । अस्य महाभाष्यस्य प्रणेता भगवान्- पतञ्जलिः इत्यत्र प्रमाण गुरुपरम्पराप्राप्तं पद्यमिदम्-

वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम् ।
पाणिनिं सूत्रकारञ्च प्रणतोऽस्मि मुनित्रयम् ॥ इति।

संस्कृतवाङ्मये यावन्ति भाष्याणि दृश्यन्ते, तानि सर्वाण्यपि केवलं भाष्यपदेनैव व्यवह्रियन्ते लोकैः । किन्तु पतञ्जलिना विरचितं न केवलं भाष्यम् अपितु महाभाष्यम् इति व्यवहारः । अत एव भाष्यात् महाभाष्यस्य वैलक्षण्यं वदता नागेशभट्टेन कथितम् उद्द्योते- ''व्याख्यातृत्वेनाऽप्यस्येष्ट्यादिकथनेन अन्वाख्यातृत्वाच्च अस्य इतरभाष्यस्यात् वैलक्षण्यात् महत्वम्'' इति। महाभाष्यं हि बहुगभीरम् अर्थदृष्ट्या किन्तु बहुसरलं भाषा दृष्ट्या इत्यर्थे सर्वेऽपि विद्वांसः स्वमतं न विभजन्ते इति ।

♦ पतञ्जलेः परिचयः-

भगवान् पतञ्जलिरनेकैर्नामभिः स्मर्यते ग्रन्थेषु । यथा गोनर्दीयः, गोणिकापुत्रः, नागनाथः, अहिपतिः, फणी, फणीभृत्, शेषः, शेषराजः, चेति । स हि गोनर्दसम्बद्धत्वेन गोनर्दीयः । गोनर्दो नाम कश्चिद् ग्रामः । गोणिकायाः पुत्रः इति गोणिकापुत्रः, शेषावतारः इति नागनाथः इत्यादयः सर्वेऽपि पर्यायशब्दाः । मातुः नाम गोणिका आसीत्। किन्तु अयं कुत्रत्यः इति सम्प्रत्यपि नैव निश्चितम् । केचित् गोनर्दीयसंज्ञया पौर्वात्यं मन्यन्ते । मत्स्यपुराणे गोनर्दजनपदः प्राच्यदेशेषु परिगणितः इति । अपरे जनाः गोनर्दनाम्ना काश्मीरेषु त्रयाणां राज्ञां सत्त्वात् काश्मीरेषु हि गोनर्दजनपदोऽस्ति इत्यपि मन्यन्ते। पतञ्जलिः महाभाष्ये पाटलिपुत्रमथुरा-साकेतकौशाम्बीप्रभृतिजनपदं स्मरति । पाटिलपुत्रे तेन पतञ्जलिना चिरकालं वासः कृतः विद्याध्ययनायेति 'इहाधीमहे, इह वसामः, इह पुष्यमित्रं याजयाम' इति महाभाष्यस्य वचनात् ज्ञायते । अपरञ्च काश्मीरेष्वेव महाभाष्यस्य असकृद् उद्धारोऽपि श्रूयते राजतरङ्गिणी-प्रभृतिग्रन्थेषु। सम्भवति महाभाष्यं हि निर्मुक्ते भगवति पतञ्जलौ, तच्छिष्यैः महाभाष्यं काश्मीरेषु नीतम् । तस्य शिष्येषु काश्मीराः दाक्षिणात्याश्च आसन् । तैः स्वस्वसङ्गृहीतं पाठं स्वान् स्वान् प्रदेशान् नयन्ति स्म । इदमपि सम्भवति यदुपरते विद्वदनुरागवति पुष्यमित्रे, तत्पुत्रोऽग्निमित्रो मगधसांम्राज्यम् अवाप । स हि विद्याविरत आसीदिति मालविकाग्निमित्रे चित्रितेन तच्चित्रेण ज्ञायते । काश्मीरेण राज्ञा अभिमन्युना जयापीडेन च भाष्यस्योद्धारः कृतः इति राजतरङ्गिणीतः ज्ञायते । तथा चोक्तं तत्र-

चन्द्रादिभिर्लब्ध्वा तस्माद्देशात्तदागमम् ।
प्रवर्तितं महाभाष्यं स्वञ्च व्याकरणं कृतम् ॥ इति

♦ पतञ्जलेः कालः-

पतञ्जलेः कालविषयेऽपि इतिहासज्ञाः नैकमताबलम्बिनो भवन्ति । केचन तं पतञ्जलिं पाणिनिसमकालिकं मन्यन्ते । केचित्तु पुष्यमित्रसमकालिकमिति । अपरे तु विक्रमसमकालिकमपि मन्यन्ते । पाणिनिसमकालिकत्वन्तु केवलं वादार्थवाद एवेति । तथापि युधिशिरमीमांसकः पतञ्जलेः कालं 2000 विक्रमसम्वतरात् पूर्वं स्वीकरोति। लोकमणिदहालस्तु विक्रमपूर्वदशमशतकमेव पतञ्जलेः स्थितिकालं स्वीकरोति । पतञ्जलिः हि काठकसंहिताध्यायीति कथ्यते । संवादशैल्यां प्रोक्तं महाभाष्यमेतत् वार्तिकानां सूत्राणाञ्च व्याख्यानम् इति ।

- ♦ **महाभाष्यस्योद्धारः**

महाभाष्यस्य उद्धारः प्रथमतया चन्द्राचार्येण कृतः । द्वितीयोद्धारश्च क्षीराख्येन विदुषा कृता इति राजशेखरकृतायां राजतरङ्गिण्यां स्पष्टम् । एवं पुनः पुनः उद्धारे यत्र कुत्र मौलिकता भवेदपि रूपान्तरिता तथापि ग्रन्थान्तरपेक्षया महाभाष्यं मौलिकरूपेणैव स्थितम् ।

- ♦ **पतञ्जलेः कृतयः**

भगवान् पतञ्जलिः महाभाष्यं विहाय महानन्दकाव्यम्, चरकपरिष्कारम्, सिद्धान्तसारावलीम्, कोषग्रन्थम्, आर्यपञ्चशीतिम्, साहित्यशास्त्रम्, लौहशास्त्रञ्च लिखितवान् इति। पतञ्जलेः महानन्दकाव्यं समुद्रगुप्तः कृष्णचरिते स्मरति । अवशिष्टग्रन्थानां प्रणेता कतमः पतञ्जलिरिति नैव अधुना अपि निर्णीतम् । केचन चरकमपि पतञ्जलेरेव नामान्तरं मन्यन्ते । एवं प्रकारेण यद्यपि महाभाष्यग्रन्थः पाणिनिसूत्रव्याख्याभूतः। अथापि अत्र सर्वे पक्षाः चिन्तिताः सन्ति । अत एव ये केचन आधुनिकाः दार्शनिकाः स्वसिद्धान्तं स्थापयन्ति ते महाभाष्यप्रमाणेनैव स्थापयन्ति । अत एवोक्तम्– सर्ववेदपारिषदं हीदं शास्त्रम् इति ।

१०.३.५ **भर्तृहरिः–**

भर्तृहरिणा महाभाष्यस्य सूक्ष्मदृष्ट्या आलोडनं विधाय, स्वगुरुद्वारा लब्धव्याकरणागमं चाधारीकृत्य 'वाक्यपदीयम्' इति नाम्ना व्याकरणशास्त्रसम्बद्धः एको महत्त्वपूर्णः दार्शनिकग्रन्थः लिखितः । ग्रन्थः अयं त्रिषु भागेषु विभक्तो वर्तते । आगमकाण्डं वाक्यकाण्डं पदकाण्डम् इति भेदेन । वाक्यञ्च पदञ्चेति वाक्यपदम्। वाक्यपदमधिकृत्य कृतो ग्रन्थः वाक्यपदीयं कथ्यते। तत्र प्रथमं काण्डं व्याकरणदर्शनस्य भूमिकारूपं भवति। अत्र ब्रह्मकाण्डे अखण्डवाक्यस्वरूपस्य विचारः कृतः । तदेव स्फोटपदेन शब्दब्रह्मपदेन वा व्यवह्रियते। अनेन काण्डेन व्याकरणस्य दर्शनत्वं स्थापितं भवति। द्वितीये काण्डे दार्शनिकदृष्ट्या वाक्यविषयकविचारः कृतो विद्यते । एवं तृतीये काण्डे पदविषयकविचारः वर्तते । वाक्यपदीयस्य अपरं नाम 'वाक्यप्रदीपः' इत्यपि आसीत् । तच्च बूहलरनाम्ना विदुषा मनुस्मृतिग्रन्थस्य मेधातिथिभाष्यस्य भूमिकायां कथितम् ।

- ♦ **भाषातत्त्वं वाक्यपदीयञ्च–**

वाक्यपदीयं प्राचीनभाषाविज्ञानस्य प्रमुखः ग्रन्थो वर्तते । ग्रन्थेऽस्मिन् शब्दार्थविषये तयोः सम्बन्धविषये च निरूपणं दार्शनिकरूपेण कृतं वर्तते । अधुना वैयाकरणानां दार्शनिकतत्त्वानां विशदं विवेचनं ग्रन्थेऽस्मिन्नेव लभ्यते । डॉ० सत्यकामवर्मणा वाक्यपदीये विप्रकीर्णानि भाषातत्त्वानि विचार्य आधुनिकभाषाविज्ञानसन्दर्भे स्वरचितभाषातत्त्वग्रन्थे वाक्यपदीये च रमणीयं विवेचनं कृतमस्ति ।

- ♦ **भर्तृहरिकालः–**

अस्य भर्तृहरेः कालः 400 विक्रमसम्वत्सरात् पूर्वं स्वीक्रियते । भर्तृहरिः स्वग्रन्थेषु क्वचिदपि स्वविषये चर्चां न कृतवान् । अतः अस्य जन्मस्थलं कुत्र वर्तते इति सप्रमाणं वक्तुं क्लेशकरमेव । तथापि एतद् अनुमीयते यत् काश्मीरकैः जयादित्यवामनादिभिः प्रथमतया नाम्ना स्मृतत्वात् तथैव काश्मीरकाभ्यामेव हेलाराजपुण्यराजाभ्यां वाक्यपदीयस्य व्याख्यानात्, काश्मीरदेशीयैरेव सोमानन्दाचार्यादिभिः वाक्यपदीयस्य उद्धरणात्, किञ्च प्रायः महाभाष्यस्य काश्मीरेषु एवोपलब्धिसत्त्वात् अयं भर्तृहरिरपि काश्मीरदेशीय इत्यनुमीयते । अयं स्वगुरुविषयेऽपि न कुत्रापि प्रोक्तवान् । तथापि पुण्यराजः भर्तृहरेः गुरोः नाम वसुरातः इति लिखितवान् ।

केचन भर्तृहरिं विक्रमादित्यस्य सहोदरं भ्रातरं मन्यन्ते । केचन च पतञ्जलेः शिष्यमपि कथयन्ति ।

- **भर्तृहरेः कृतयः**

अयं भर्तृहरिः बहून् ग्रन्थान् लिखितवान् । ते च ग्रन्थाः-

1. महाभाष्यदीपिकाः।
2. वाक्यपदीयम्।
3. वाक्यपदीयटीकादीपिका।
4. भट्टिकाव्यम्।
5. भागवृत्तिः।
6. शतकत्रयम्।
7. मीमांसासूत्रवृत्तिः।
8. वेदान्तसूत्रवृत्तिः
9. शब्दधातुसमीक्षा चेति।

- **वाक्यपदीयस्य वैशिष्ट्यम्, दार्शनिकत्वं च**

वाक्यपदीयस्य आगम-वाक्य-पद-(प्रकीर्ण)खण्डानि भवन्ति। सम्प्रति सम्पूर्णतया समुपलभ्यते अयं ग्रन्थः। ग्रन्थोऽ्यं प्रायः द्विसहस्रकारिकासु गुम्फितः वर्तते । तत्र ब्रह्मकाण्डं हि पस्पशाभागोऽस्य ग्रन्थस्य। अत्र ब्रह्मकाण्डे अखण्डवाक्यस्वरूपस्य विचारः कृतः । तदेव स्फोटपदेन शब्दब्रह्मपदेन वा व्यवह्रितो विद्यते। अत्र काण्डे व्याकरणस्य दर्शनत्वं स्थापितं भवति। तदनुसारेण शब्दतत्त्वं हि अनादिनिधनमक्षरञ्च यतोऽर्थभावेन जगतः प्रक्रिया प्रवर्तते। उक्तञ्च ब्रह्मकाण्डे-

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्तते अर्थभावेन प्रक्रिया जगतो यतः॥ इति।

नादात्मिकायाः वाचः पश्यन्ती-मध्यमा-वैखर्यवस्थापन्ना व्याकरणविषयाः। परावस्था तु सूक्ष्मत्वेन दुर्निरूपा । एकैव नादात्मिका वाक् मूलाधाराद् उदिता सती परा इति उच्यते। सैव हृदय प्रदेशं प्राप्ता पश्यन्तीत्युच्यते योगिभिः द्रष्टुं शक्यत्वात्। सैव वृद्धिं गता विवक्षां प्राप्ता मध्यमा, मध्ये उरोभागे प्राप्तत्वात् । सैव वक्त्रं प्राप्ता ताल्वोशदिव्यापारेण बर्हिर्निगच्छन्ती वैखरीत्युच्यते । अर्थप्रवृत्तितत्वानां शब्दा एव निबन्धनम् । शब्दानां तत्त्वावबोधो व्याकरणादेव भवति । तदाश्रयेणैव प्रणवरूपब्रह्मणोऽधिगमः । व्याकरणं शब्दसाधुव्यवस्थापकं शास्त्रम् । शब्दैः सहार्थसम्बन्धा अपि नित्या भवन्ति । मध्यमानादाभिव्यङ्ग्यस्य शब्दस्य स्फोटात्मकता ब्रह्मरूपता नित्यता च। तस्यैव ध्वन्यात्मकस्य अनित्यताः। उक्तञ्च- ''अनेकव्यक्त्यभिव्यङ्ग्या जातिः स्फोटः इति स्मृतः'' इति। ध्वनयस्तु शब्दजाः शब्दा एव । स्फोटो नित्यो ध्वनयस्तु अनित्या भङ्गुरत्वात् । प्राकृतवैकृतेति ध्वनिद्वयम् । तत्र प्राकृतध्वनिव्यतिरेकेण स्फोटस्य अनधिगन्तृत्वात्। प्राकृतध्वनिः स्फोटरूप इव मन्यते । स एव ह्रस्वदीर्घप्लुतादिव्यवहारहेतुः। अन्तकरणास्थितो वा बुद्धिस्थितः शब्दो ध्वनीनां कारणम्। बुद्धीन्द्रियादिषु शब्दसंस्कारो जायते। बुद्धिभेदादभिन्नस्य शब्दस्य भेदोऽपि भवति । व्यवहारे प्रवृत्तिनिवृत्तिकत्वाद् वाक्यमेव

प्राधान्यं भजते । पदानि तु तस्य ज्ञानसौकर्यार्थं प्रकल्पितानि अङ्गानि एव । वाक्यसम्बन्धे अष्टौ विकल्पा: भवन्ति । तथा उक्तं वाक्यपदीये–

अविकल्पेऽपि वाक्यार्थे विकल्पा भावनाश्रयाः ।
अत्राधिकरणे वादाः पूर्वेषां बहुधा गताः ॥ इति ।

द्वितीये काण्डे दार्शनिकदृष्ट्या वाक्यविषयकविचार: कृतो विद्यते । एवं तृतीये काण्डे पदविषयकविचारश्च विशेषेण वर्तते ।

दार्शनिकग्रन्थेषु सर्वतो महान् अयं ग्रन्थ: कारिकारूप: । नहि वैयाकरणा: एव अपि तु अन्यशास्त्रसंपोषका: अपि वाक्यपदीयं प्रमाणत्वेन स्वीकुर्वन्ति विदुषा अत्र महान् विचार: कृत:। अत्र ही कालाख्या शक्ति: स्वीकृता अस्ति। शब्द: स्फोटरूप:। स च ब्रह्म एव भवति। इत्यादि उक्तमत्र।

१०.३.६ **मण्डनमिश्रः**

अनेन महाभागेन 'स्फोटसिद्धि:' नामको दार्शनिको ग्रन्थो व्यलेखि । अस्मिन् ग्रन्थे 36 कारिका: सन्ति:। अस्य ग्रन्थस्योपरि मण्डनमिश्रस्य स्वलिखिता टीका वर्तत। अस्मिन् दार्शनिकग्रन्थे स्फोटविषये मण्डनमहाभागेन व्याकरविषयकविचार: प्रस्तुतोऽस्ति।

♦ **मण्डनमिश्रस्य परिचयः**

शङ्करदिग्विजयादिग्रन्थानुसारेण मण्डनमिश्र: कुमारिलभट्टस्य शिष्य: आसीत् । मण्डनमिश्रस्य भार्याया: नाम भारती आसीत् । शङ्कराचार्येण सह मण्डनमिश्रस्य महान् शास्त्रार्थ: प्रवर्तित: । तत्र शास्त्रार्थे भारती निर्णायकत्वेन अतिश्त् इति जनश्रुत्या ज्ञायते ।

♦ **मण्डनमिश्रस्य पाण्डित्यम्–**

मण्डनमिश्र: स्वकाले परम: विद्वान् आसीत् । एतेषां गृहद्वारे कीराङ्गना: अपि वेदानां स्वत: प्रामाण्यविषये शास्त्रार्थं कुर्वन्त्य: आसन् । शङ्करदिग्विजयानुसारेण ज्ञायते यत् शङ्कर: महिष्मत्यां गत्वा काञ्चित् जलहारिणीं मण्डनमिश्रविषये पृष्टवान् । तदा सा जलहारिणी उत्तरत्वेन कथयति–

स्वतः प्रमाणं परतः प्रमाणं कीराङ्गना यत्र गिरं गिरन्ति ।
द्वारस्थनीडातरुसन्निपाते जानीहि तन्मण्डनमिश्रधाम ॥ इति ।

अद्वैतसम्प्रदाये एक: प्रसिद्धि: वर्तते यत् शङ्कराचार्यात् पराजित: सन् मण्डनमिश्र: शङ्कराचार्यस्य अनुयायित्वेन अद्वैतवादी अभूत् । ततश्चायं सुरेश्वराचार्य नाम्ना प्रसिद्धिं प्राप्नोदिति । अनैकै: लेखकै: अयं सुरेश्वराचार्य: मण्डनमिश्रनाम्ना उद्धृत: वर्तते ।

♦ **मण्डनमिश्रस्य कालः–**

मण्डनमिश्रस्य गुरो: कुमारिलभट्टस्य शङ्कराचार्यस्य च काल: प्राय: 800 त: 820 विक्रमसम्वत् स्वीक्रियते । स एव काल: मण्डनमिश्रस्यापि काल: वर्तते । किन्तु युधिश्रिमहोदयेन मण्डनमिश्रस्य काल: 695 विक्रमसम्वत्सरात् पूर्व: काल: प्रतिपादित: ।

१०.३.७ **परमेश्वरः**

मण्डनमिश्रस्य 'स्फोटसिद्धि:' इति ग्रन्थस्योपरि ऋषिपुत्र: परमेश्वर: एकामुत्कृष्टां

व्याख्यां लिखितवान् । तत्र व्याख्यायां अनेन महाभागेन स्फोटविषयका: दार्शनिकविचारा: विचारिता: । अत: अयं परमेश्वर: अपि दार्शनिकग्रन्थकारेषु प्रसिद्धो जात: ।

♦ **परमेश्वरस्य परिचयः-**

दक्षिणभारते एका परम्परा वर्तते नामकरणसन्दर्भे, तदनुसारेण ज्येश्पुत्रस्य नामकरणं तत्पितामहस्य नाम्ना क्रियते ।

अनेन प्रकारेण एकस्मिन् वंशे नामद्वयं बहुकालं यावत् अनुवर्तितं भवति । अत: अस्य परमेश्वरस्य काल निर्धारणे महती समस्या वर्तते । तथापि युधिश्रिमीमांसकमहोदयानुसारेण अस्य काल: 1600 विक्रमसम्वत् स्वीकृतो वर्तते ।

♦ **परमेश्वरस्य वंशवृक्षः**

अस्य परमेश्वरस्य वंशविषये स्फोटसिद्धिग्रन्थस्य सम्पादकमहोदयेन रामनाथशास्त्रिणा बहुयत्नं विधाय इत्थं लिखितम्-

परमेश्वरस्य- माता- गौरी, पिता- ऋषि:, पितृव्य:- भवदास:, भार्या: गोपालिका चासीत् । अस्य परमेश्वरस्य पञ्च पुत्रा: आसन् । ते च ऋषि:, भवदास:, वासुदेव:, सुब्रह्मण्य:, शङ्करश्च । पुनश्च ऋषिपुत्र: परमेश्वर: (गोपालिकाभर्ता) । पुनश्च तत्पुत्र: ऋषि:, तत्पुत्रश्च परमेश्वर: - मीमांसासूत्रार्थसंग्रहकर्ता। मण्डनमिश्रस्य स्फोटसिद्धिरिति ग्रन्थस्य व्याख्याता परमेश्वर: आसीत् । अत: परमेश्वरस्य मातु: नाम गोपालिका आसीत् । एतस्मात् कारणात् 'स्फोटसिद्धि:' इत्यस्य टीकाकर्ता, द्वितीय-ऋषिपुत्र: परमेश्वर: आसीत् । अनेन लिखिताया: टीकाया: नाम गोपालिका आसीत्। किञ्च परमेश्वरेण गोपालिका टीकायां निरुक्तग्रन्थस्योपरि लिखितस्य निरुक्तवार्तिकस्य वचनानि उद्धृतानि । तथा चोक्तम्-

असाक्षात् कृतधर्मभ्यस्तेऽवरेभ्यो यथाविधिः ।
उपदेशेन सम्प्रातुर्मन्त्रान् ब्राह्मणमेव च ॥ इति ।

१०.३.८ **भरतमिश्रः**

भरतमिश्रेण स्फोटसिद्धिनामको ग्रन्थ: स्फोटविषयक: प्रणीतोऽस्ति । तस्मिन् ग्रन्थे प्रत्यक्षा, अर्था:, आगमश्च इति रीत्या त्रय: परिच्छेदा: वर्तन्ते । भरतमिश्र: मण्डनमिश्रस्य अनुवर्ती आसीत् ।

♦ **भरतमिश्रस्य परिचयः**

अयं स्वग्रन्थे स्वविषये न किमपि लिखितवान् । अत: अस्य देशकालादिविषये न किमपि उपलभ्यते । स्फोटसिद्धिन्यायविचारस्य आरम्भे मण्डनात् परं भरतमिश्रस्य निर्देशो वर्तते । अत: वक्तुं शक्यते यदस्य समय: मण्डनात् परं वर्तते । तत्र निर्देश: यथा-

प्रणिपत्य गणाधीशं गिरां देवीं गुरुनपि ।
मण्डनं भरतं चापि मुनित्रयमनुहरिम् ॥ इति ।

भरतमिश्रकृतस्फोटसिद्धे: प्रसिद्धानि स्थलानि- ''भगवदौदुम्बरायणाद्युपदिष्टा-खण्डभावमपि व्यञ्जकारोपितनान्तरीयकभेदक्रमविच्छेदादिनिविष्टै: परैरेकाकारनिर्भासम् अन्यथा सिद्धीकृत्यार्थधीहेतूनां चान्यत्र सञ्चार्य भगवदौदुम्बरायणादीनपि भगवदुपवर्षादिभिर्निर्माय पालितम् इति ।

१०.३.९ **भट्टोजिदीक्षितः**–

भट्टोजिदीक्षितः व्याकरणशास्त्रस्य दार्शनिकान् विचारान् उपस्थापयितुं विशिष्टं ग्रन्थं लिखितवान् । असौ ग्रन्थः वर्तते 'वैयाकरभूषणसारकारिकावली' इति । ग्रन्थेऽस्मिन् अनेन विदुषा व्याकरणविषयकाः सर्वेऽपि दार्शनिकविचाराः प्रतिपादिताः । अत्र सर्वविधाः कारिकाः सन्ति। स्फोटविषयिका, शब्दस्य नित्यानित्यविषयिकाश्चेति । अस्य आकरग्रन्थः शब्दकौस्तुभः। अत्र सर्वं विस्तरतः प्रतिपादितं विद्यते।

♦ **भट्टोजिदीक्षितस्य परिचयः**–

1570–1650 मितवैक्रमब्दानभितः स्थितिमता भट्टोजिदीक्षितेन पाणिनीयाष्टकोपरि शब्दकौस्तुभनाम्नी महती वृत्तिः प्रणीताऽस्ति । साप्यधुना सम्पूर्णा नैवोपलभ्यते । वस्तुतस्तु शब्दकौस्तुभो महाभाष्य-प्रदीप-काशिका-पदमञ्जरीणां नवावतार एव । अयं भट्टोजिदीक्षितः दाक्षिणात्यः आसीत् । किन्तु कर्मक्षेत्रं काशीदेशः आसीत्।

♦ **भट्टोजिदीक्षित वंशः**–

श्रीनारायणशास्त्रिपेण्डसेमहोदयः शब्देन्दुशेखरे भट्टोजिदीक्षितस्य विद्यायोनिसम्बन्ध विषये वंशवृक्षः एवं दर्शितः– भट्टोजिदीक्षितस्य पिता-लक्ष्मीधरः, लक्ष्मीधरस्य द्वौ पुत्रौ- भट्टोजिदीक्षितः, रङ्गोजिभट्टः रङ्गोजिभट्टस्य पुत्रः कौण्डभट्टः, भट्टोजिदीक्षितस्य पुत्रः भानुदीक्षितः, तस्य हरिदीक्षितः, हरिदीक्षितस्य शिष्यः नागेश भट्टः, नागेशस्य वैद्यनाथादयः। दीक्षितस्य गुरुः शेषकृष्णः।

व्याकरणमधिकृत्य दीक्षितस्य प्रथमः प्रयासः शब्दकौस्तुभः ततश्च सिद्धान्तकौमुदी, तद्व्याख्या प्रौढमनोरमा । स एव कथयति कौमुद्याः उत्तरकृदन्तप्रकरणान्ते–

इत्थं लौकिकशब्दानां दिङ्मात्रमिह दर्शितम् ।
विस्तरस्तु यथाशास्त्रं दर्शितः शब्दकौस्तुभे ॥

भट्टोजिदीक्षितस्य सिद्धान्तकौमुदी सर्वस्मिन्नपि जगति नितरां प्रसिद्धा वर्तते। सा च कौमुदी सर्वत्रापि पठनपाठने दृग्गोचरीभूता वर्तते ।

१०.३.१० **कौण्डभट्टः**–

अनेन कौण्डभट्टेन व्याकरणदर्शनस्य विषये एकः महान् ग्रन्थः निरमायि । ग्रन्थेऽस्मिन् व्याकरणस्य सर्वेऽपि दार्शनिकविचारः प्रकटीकृताः । अनेन विदुषा वैयाकरणभूषणसारे चतुर्दशवैयाकरणप्रमेया निरुपिताः। ते च धात्वर्थः, लकारार्थः, सुबर्थः, नामार्थः, समासशक्तिः, नञर्थः, निपातार्थः, भावप्रत्ययार्थः, देवताप्रत्ययार्थः, अभेदैकत्वसंख्या, संख्याविवक्षा, कृत्प्रत्ययार्थः, स्फोटनिर्णयश्चेति ।

♦ **कौण्डभट्टस्य वंशः कालश्च**–

कौण्डभट्टस्य पिता-रङ्गोजिभट्टः, पितृव्यः भट्टोजिदीक्षितः, अस्य कालः 1660 विक्रमसम्वत् स्वीक्रियते ।

१०.३.११ **नागेशभट्टः**–

नागेशभट्टो हि वैयाकरणानां दार्शनिकविचारस्य प्रकाशः वर्तते । अनेन महावैयाकरणेन वैयाकरणसिद्धान्तमञ्जूषाख्यो वैयाकरणदार्शनिकग्रन्थः प्रणीतोऽस्ति। अस्य हि

वैयाकरणसिद्धान्त– मञ्जूषा, लघुमञ्जूषा, परमलघुमञ्जूषा चेति त्रयः दार्शनिकग्रन्थाः दृश्यन्ते । मञ्जूषायाम्– वर्णस्फोटसामान्यनिरूपणम्, शक्तिः, लक्षणानिरुक्तिः, व्यञ्जनानिरुक्तिः, धात्वर्थविचारः, निपातसामान्यर्थविचारः, नञर्थविचारः, एवकारार्थविचारः, तिङर्थविचारः, सनाद्यर्थविचारः, कृदर्थविचारः, नामार्थविचारः, सुबर्थविचारः, समासशक्तिः त्वाद्यार्थः, तद्धितार्थः, पदवाक्यस्फोटौ, अखण्डपदवाक्यस्फोटः इत्येमादयः विषयाः निरूपिताः सन्ति ।

नागेशभट्टस्य जीवनपरिचयः गतपाठे दत्तोऽस्ति ।

१०.३.१२ **अन्ये दार्शनिकग्रन्थाः**–

ग्रन्थकाराः	–	**ग्रन्थाः**
केशवकविः	–	स्फोटप्रतिश।
शेषकृष्णकविः	–	स्फोटतत्त्वम्।
श्रीकृष्ण भट्टः	–	स्फोटचन्द्रिका।
आपदेवः	–	स्फोटनिरूपणम्।
कुन्दभट्टः	–	स्फोटवादः।
जगदीशर्कालङ्कारः	–	शब्दशक्तिप्रकाशिका
तारानाथतर्कवाचस्पतिः	–	शब्दार्थरत्नम्।
इन्द्रदत्तः	–	फक्किकाप्रकाशः।
गोकुलनाथः	–	पदवाक्यरत्नाकरः।
रामाज्ञापाण्डेयः	–	व्याकरणदर्शनभूमिकादयः।
रङ्गनाथपाठकः	–	स्फोटदर्शनम्।

एवं प्रकारेण स्फोटायनादारभ्य प्रवर्तितं व्याकरणदर्शनं सम्प्रत्यपि दिनानुदिनं बलवदस्ति। एवञ्च व्याकरणं न केवलं प्रक्रियापक्षपोषकमेव, अपितु दार्शनिकपक्षपोषकमपि भवति । अत्र सिद्धान्ततः शब्दब्रह्मण एव जगत्सृष्टिः भवति। अनादिनिधनं ब्रह्म इत्युक्ते। अन्यत्र वैयाकरणरीत्या सृष्टिरपि वर्णिता विद्यते।

बोधप्रश्नाः

1. दर्शनशब्दस्य का व्युत्पत्तिः?

   ....।

2. स्फोटायनस्य कः कालः?

   ....।

3. भर्तृहरेः प्रसिद्धः दार्शनिकग्रन्थः

   ....।

4. भट्टोजिदीक्षितस्य पिता कः?

....।

5. कौण्डभट्टस्य दार्शनिकग्रन्थः कः?

....।

6. संग्रहग्रन्थे कति वस्तूनि परीक्षितानि?

....।

7. स्फोटसिद्धान्तः केन प्रवर्तितः?

....।

१०.४ सारांशः

दृश्यते अनेन इति दर्शनम्। दर्शनसम्बन्धिग्रन्थाः दार्शनिकग्रन्थाः। व्याकरणाध्ययनेन मोक्षप्राप्तिः, शब्दस्य नित्यत्वम् अनित्यत्वं वा, शब्दार्थयोः सम्बन्धः इत्यादिविषयणी चर्चा यत्र प्रचलति तत्सर्वमपि दर्शनपदभाग् भवति। एवञ्च वैकरणनिकाये बहवः दार्शनिकाः अभूवन्। ते सर्वेऽपि स्फोटायनादारभ्य रङ्गनाथपाठकपर्यन्तं विद्वांसः व्याकरणे दार्शनिकग्रन्थान् प्रणीतवन्तः। अत्र दार्शनिकेषु भर्तृहरेः स्थानं प्रथमतया वर्तते। यतो हि अनेन 'वाक्यपदीयम् इति ग्रन्थे व्याकरणस्य सर्वेऽपि दार्शनिकविचाराः समुपस्थापिताः। महाभाष्यं तु आकरग्रन्थो भवति, तत्र तु सर्वेपि विषयाः वर्णिताः सन्ति।

१०.५ शब्दावली-

औदुम्बरायणः - उदुम्बस्य अपत्यं पुमान्।

अनुमानाकारः - अनुमानस्य आकारः।

नितराम् - अतीव

१०.६ बोधप्रश्नोत्तराणि-

1. दृश्यते अनेन आत्मतत्त्वम् इति दर्शनम् ।
2. स्फोटायनस्य कालः 3200 विक्रमसम्वतरात्पूर्वमस्ति ।
3. भर्तृहरेः प्रसिद्धः दार्शनिकग्रन्थः 'वाक्यपदीयम्' अस्ति ।
4. भट्टोजिदीक्षितस्य पिता लक्ष्मीधरः अस्ति ।
5. कौण्डभट्टस्य दार्शनिकः ग्रन्थः वैयाकरणभूषणसारः ।
6. संग्रहग्रन्थे चतुर्दशसहस्राणि वस्तूनि परीक्षितानि ।
7. स्फोटायनेन स्फोटसिद्धान्तः प्रवर्तितः ।

१०.७ सन्दर्भग्रन्थः

व्याकरणशास्त्रीयेतिहासः

१०.८ सहायकग्रन्थाः-

1. व्याकरणशास्त्र का इतिहास - पं युधिश्रिरमीमांसकमहोदयः।
2. व्याकरणशास्त्रेतिहासः - लोकमणिदहालः।
3. संस्कृतव्याकरणशास्त्रेतिहासः - डा. अशोकचन्द्र गौडः।
4. संस्कृतशास्त्रों का इतिहास - श्री बलदेव उपाध्यायः

१०.९ अभ्यासप्रश्नाः-

क- लघूत्तरीय प्रश्नाः

1. पाणिनिना कस्मिन् सूत्रे स्फोटायनस्य नाम गृहीतम् ?

----

2. व्याडेः कः ग्रन्थः प्रसिद्धः ?

----

3. वाक्यपदीयं कस्य रचना ?

----

4. 'स्फोटसिद्धिः' केन लिखिता ?

ख-दीर्घोत्तरीयप्रश्नाः

1. भर्तृहरेः विषये दशभिः वाक्यैः लिखतु ।
2. नागेशभट्टस्य विषये सप्तभिः वाक्यैः लिखतु ।
3. व्याडिमधिकृत्य एकः लघुनिबन्धः लेख्यः ।

एकादशः पाठः – प्रातिशाख्यम्

११.१ प्रस्तावना

मुक्तस्वाध्यायपीठस्य आचार्यकक्ष्यायाः पञ्चमपत्रस्य व्याकरणशास्त्रीयेतिहासखण्डं भवान् पठति। अस्मिन् पत्रे भवान् दश पाठान् अधीतवान् अस्ति । तत्र दशमे पाठे भवान् व्याकरणस्य विविधान् दार्शनिकग्रन्थान् ग्रन्थकारांश्च ज्ञातवान् । तेषां परिचयः कालः कृतिः इत्यादीन् सम्यगधीतवान् । तत्रापि प्राधान्येन स्फोटायनः, औदुम्बरायणः, व्याडिः, पतञ्जलिः, भर्तृहरिः, मण्डनमिश्रः, परमेश्वरः, भरतमिश्रः, भट्टोजिदीक्षितः, कौण्डभट्टः, नागेशः इत्येतेषां विषये विस्तरेण ज्ञातवान्।

अस्मिन् पाठे भवान् वेदसम्बन्धि यद्व्याकरणं तद्विषये ज्ञास्यति। तस्य प्रातिशाख्यमिति व्यवहार:। अत्र पाठे प्रातिशाख्यशब्दस्य विग्रहम् अर्थञ्च ज्ञात्वा विविधानां प्रातिशाख्यानां, तत्स्वरूपविषये, प्रवक्तृणां विषये च विस्तरेण ज्ञास्यति।

११.२ उद्देश्यम्

अस्य पाठस्य अध्ययनेन भवान् –

१. प्रातिशाख्यस्य वैशिश्ट्यं ज्ञास्यति।

२. प्रातिशाख्यस्य विस्तशतं ज्ञानं प्राप्स्यति।

३. उपलब्धानां प्रातिशाख्यानामध्ययने प्रवशत्तिं करिष्यति।

४ अधीत्य अन्येषामनुपलब्धानां प्रातिशाख्यानाम् अन्वेषणे रत: भविष्यति।

५. प्रातिशाख्यप्रवक्तृणां जीवनविषये शोधकार्यं कर्तुं प्रभविष्यति।

११.३ प्रातिशाख्यपरिचय:

शाखां शाखां प्रति प्रतिशाखम् इत्यव्ययीभावसमास:। प्रतिशाखं भव: इत्यर्थे अव्ययीभावाच्च (पा.सू.४.३.५९) इति सूत्रेण ज्यप्रत्यये आदिवृद्धौ प्रातिशाख्यम् इति रूपं सिद्ध्यति । शाखा इति शब्दस्य वेदभाग: इत्यर्थ:। वेदसम्बन्धि व्याकरणं, उच्चारणविज्ञानञ्च यत्र नियमरूपेण व्याख्यातं स: ग्रन्थ: प्रातिशाख्यम् इत्युच्यते। प्रातिशाख्यशब्दस्य शब्दान्तरमपि विविधेषु प्राचीनग्रन्थेषु उपलभ्यते। तद्यथा यास्कस्य निरुक्ते "पदप्रकृतीनि सर्वचरणानां पार्षदानि" (निरुक्तम् १.१७) इति पार्षदशब्द:। तथा च व्याकरणमहाभाष्ये–"सर्ववेदपारिषदं हीदं शास्त्रम्" (व्याकरणमहाभाष्यम् ६.३.१४) इति वाक्ये पारिषदशब्द:।

वेदस्य प्रत्येकं शाखाया: नियमानां वर्णनं प्रातिशाख्ये उपलभ्यते। परन्तु प्रातिशाख्यानि यदि पठ्यन्ते तर्हि ज्ञायते यत् तेषु कस्याश्चिदेकस्या: एव शाखाया: नियमानां निर्देश: नास्ति अपि तु एतेषु प्रत्येकमपि चरणस्य सर्वासां शाखानां नियमानां सामान्यरूपेण विवरणं दृश्यते । तदुक्तं निरुक्ते यास्काचार्येण "पदप्रकृतीनि सर्वचरणानां पार्षदानि" (निरुक्तम् १.१७) भट्टकुमारिलोऽपि आह–"धर्मशास्त्राणां गृह्यग्रन्थानां च प्रातिशाख्यलक्षणवत् प्रतिचरणं पाठव्यवस्थोपलभ्यते"।

यास्काचार्यस्य मतानुसारेण प्रातिशाख्यानि पदप्रकृतीनि। पदानि एव प्रकृतीनि येषु तानि पदप्रकृतीनि। अर्थात् प्रातिशाख्येषु पदानि एव प्रकृतित्वेन मत्वा संहितायां यानि स्वरादिपरिवर्तनानि जायन्ते तेषां वर्णनं क्रियते। प्रातिशाख्यानि यदि अवलोक्यन्ते तर्हि यास्काचार्यस्य मतं युक्तं प्रतिभाति। प्रातिशाख्येषु शिक्षाया: अर्थात् वर्णानाम् उच्चारणविज्ञानस्य अपि सूक्ष्म: उल्लेख: क्वचिद् दश्श्यते।

पौरस्त्या: पाश्चात्याश्च विद्वांस: कथयन्ति यत् प्रातिशाख्यानि ऐन्द्रसम्प्रदायेन सम्बद्धानि इति।

प्राचीनकाले चरणेऽर्थे 'प्रतिशाखा' इति शब्द: प्रयुज्यते स्म। शाखा इति हि 'अवान्तरशाखा' इति शब्देन व्यवह्रियते स्म। तदुक्तं विष्णुपुराणे –"इत्येता: प्रतिशाखाभ्योऽप्यनुशाखा द्विजोत्तम"(विष्णुपुराणम् ३/४/२५) इत्थं क्रमेण भवान् प्रातिशाख्यविषये सामान्यपरिचयं

प्राप्तवान्। इतः परम् अग्रिमे बिन्दौ भवान् विविधप्रातिशाख्यग्रन्थानां, तेषां कर्तॄणां च विषये विस्तरेण ज्ञास्यति।

बोधप्रश्नाः

१. प्रातिशाख्यशब्दस्य व्युत्पत्तिः का?

....

....

....

२. प्रातिशाख्य इति शब्दे केन सूत्रेण कस्मिन् अर्थे ञ्यप्रत्ययः?

....

....

....

३. प्रातिशाख्यशब्दस्य पर्यायवाचिपदानि कानि?

....

....

....

४. सर्ववेदपरिषदं हीदं शास्त्रम्। इति कुत्र उक्तम्

....

....

....

११.४ प्रातिशाख्यग्रन्थाः तत्प्रणेतारश्च

एवं हि श्रूयते यत् प्राचीनकाले प्रातिशाख्यसदृशाः वेदसम्बद्धाः लक्षणग्रन्थाः बहवः आसन् इति। सम्प्रति उपलभ्यमानेषु प्रातिशाख्येषु प्रायेण एकोनषश्लिक्षणग्रन्थानाम् एव उल्लेखो दृश्यते। परन्तु इदानीं सर्वे ते ग्रन्थाः नोपलभ्यन्ते। केचन उपलभ्यन्ते, तत्रापि दश प्रातिशाख्यग्रन्थाः, अष्टौ प्रातिशाख्यसदृशानां लक्षणग्रन्थानां नामानि एव उपलभ्यन्ते। के ते ग्रन्थाः इति जानातु भवान्। तथहि –

१. ऋक्प्रातिशाख्यम्

२. आश्वलायनप्रातिशाख्यम्

३. बाष्कलप्रातिशाख्यम्

४. शाङ्खायनप्रातिशाख्यम्

५. वाजसनेयप्रातिशाख्यम्

६. तैत्तिरीयप्रातिशाख्यम्

७. मैत्रायणीयप्रातिशाख्यम्

८. चारायणीयप्रातिशाख्यम्

९. सामप्रातिशाख्यम्

१०. अथर्वप्रातिशाख्यम्

भवान् उपरि विविधानां प्रातिशाख्यानां नामानि ज्ञातवान्। इतः परं भवान् तेषां विषये तेषां कर्तॄणां विषये च क्रमेण ज्ञास्यति।

११.४.१ ऋक्प्रातिशाख्यम्- कर्ता=शौनकः

चतुर्षु वेदेषु आदिमः ऋग्वेदो भवति। तस्य शाखानां नियमानाम् उल्लेखः ऋक्प्रातिशाख्ये उपलभ्यते। ऋग्वेदस्य पञ्चानां चरणानां पञ्च प्रातिशाख्यानि आसन् इति श्रूयते। परन्तु तेषु एकमेव प्रातिशाख्यम् इदानीम् उपलभ्यते। अन्यानि प्रातिशाख्यानि आश्वलायनबाष्कलशाङ्खायनप्रातिशाख्यानि नोपलभ्यन्ते। तेषां नाममात्रं विविधेषु ग्रन्थेषु उल्लिखितं दृश्यते। यत् प्रतिशाख्यमुपलभ्यते तदेव इदानीम् "ऋक्-प्रातिशाख्यम्" इति नाम्ना व्यवह्रियते।

अस्य प्रातिशाख्यस्य प्रवक्ता अस्ति - अचार्यः शौनकः। आचार्यः शौनकः ऋग्वेदस्य शाकलचरणस्य ष्ाखाभिः सम्बद्धस्य एकस्य प्रातिशाख्यस्य व्याख्यां कृतवान्। तस्यैव ग्रन्थस्य "ऋक्-प्रातिशाख्यम्" "ऋक्-पार्षदः" इति नामनी प्रसिद्धे स्तः। अयं हि आचार्यः बहुभिः नामभिः प्रसिद्धः आसीत्। तद्यथा- गृहपतिः, कुलपतिः, शौनकः, बह्वृचसिंहः इति। अस्य कर्तृत्वविषये उक्तं प्रातिशाख्यस्य अस्य प्राचीनेन वृत्तिकारेण-

''तस्मादादौ तावच्छास्त्रावतार उच्यते –

शौनको गृहपतिर्वै नैमिषीयैस्तु दीक्षितैः।
दीक्षासु चोदितः प्राह सत्रे तु द्वादशाह्निके ।।''

शौनकेन ऋक्प्रातिशाख्यमतिरिच्य- अथर्वशौनकसंहिता, अथर्वप्रातिशाख्यं बृहद्देवता, दशानुक्रमणी, शौनकी शिक्षा, ज्यौतिषशास्त्रं, चिकित्साशास्त्रम् इत्यादि ग्रन्थाः रचिताः।

- **ऋग्वेदप्रातिशाख्यस्य कालः**

श्रीमतां युधिश्िरमीमांसकानां मते ऋक्प्रातिशाख्यस्य कालः विक्रमनामसंवत्सरात् ३००० वर्षपूर्वम् इति मन्यते।

- **ऋग्वेदप्रातिशाख्यस्य स्वरूपम्**

अस्मिन् प्रातिशाख्ये अशदश(१८) पटलानि सन्ति। प्रत्येकमपि पटले छन्दोबद्धानि सूत्राणि सन्ति। प्रातिशाख्येऽस्मिन् सन्ध्यादिनियमानां, पदक्रमपाठनियमानां च उल्लेखः विद्यते। अस्य प्रातिशाख्यस्य त्रयोदशचतुर्दशपटलयोः शिक्षासम्बन्धिविचारः विस्तरेण व्याख्यातः।ज्ञोडशे, सप्तदशे, अशदशे च पटले छन्दःशास्त्रविचाराः प्रोक्ताः सन्ति।

११.४.२ आश्वलायनप्रातिशाख्यम् : प्रवक्ता = आश्वलायनः

श्रीमता अनन्तेन कृतायां वाजसनेयप्रातिशाख्यटीकायाम् ऋग्वेदस्य आश्वलायनशाखायाः प्रातिशाख्यस्य उल्लेखो दश्श्यते। तद्यथा –

'नाप्याश्वलायनाचार्यादिकृतप्रातिशाख्यसिद्धत्वम्' इति।

अनेन अनन्तवर्यस्य वचनेन आश्वलायनः एव प्रातिशाख्यस्य प्रवक्ता इत्यवगम्यते। इदं प्रातिशाख्यम् अधुना नोपलभ्यते। अस्य उल्लेखोऽपि अन्यत्र कुत्रापि नोपलभ्यते।

- **आश्वलायनाचार्यस्य कालः-**

आश्वलायनप्रातिशाख्यस्य कालः कः इत्यस्मिन् विषये नास्ति कापि स्पश्ता। परन्तु आश्वलायनकृतित्वात् तस्य कालः एव अस्यापि कालः इति स्वीकर्तुं शक्यते। आश्वलायनस्य कालः विक्रमनामसंवत्सरात् ३०००वर्षेभ्यः पूर्वम् इति पण्डितानां युधिश्ठिरमीमांसकानां मतं विद्यते।

- **आश्वलायनाचार्यस्य कृतयः-**

आचार्यस्य आश्वलायनस्य बहवः कृतयः प्रसिद्धाः। यथा- पदपाठः, श्रौतसूत्रम्, गश्ह्यसूत्रम्, आश्वलायनानुक्रमणी इत्यादयः।

११.४.३ बाष्कलप्रातिशाख्यम् -

अनुपलब्धेषु प्रातिशाख्येषु इदमपि एकं भवति बाष्कलप्रातिशाख्यम्। बाष्कलस्य प्रातिशाख्यस्य यद्यपि कुत्रापि ग्रन्थेषु निर्देशः साक्षात् नोपलभ्यते, तथापि शाङ्खायनश्रौतसूत्रस्य वरदत्तसुतरचितस्य आनर्तीयभाष्यस्य वचनेन बाष्कलप्रातिशाख्यम् इति किञ्चिदस्ति इति अनुमीयते। तथाहि -

"उपद्रुतो नाम सन्धिर्बाष्कलादीनां प्रसिद्धः" (शाङ्खायनश्रौतसूत्रम् १२.१३.५) अनेन वचनेन एतदपि अवगम्यते यत् बाष्कलप्रातिशाख्ये उपद्रुतः नामकः कश्चित्-सन्धिः आसीत् इति। शाङ्खायनश्रौतसूत्रस्य भाष्येऽपि किञ्चिद्वचनं दृश्यते। यथा-

"किन्तु बाष्कलानामप्रगश्ह्यः, तदर्थं वचनम्" (शा.श्रौ-१.२.५)

एतदतिरिच्य अस्य प्रातिशाख्यस्य विषये विवरणं क्वापि नोपलभ्यते। बाष्कल इति नामदर्शनात् बाष्कलनामकः कश्चिदाचार्यः अस्य प्रवक्ता आसीदित्यनुमीयते।

११.४.४. शाङ्खायनप्रातिशाख्यम्

इदमपि ऋग्वेदस्य किञ्चित् प्रातिशाख्यम्। अस्य एकः हस्तलेखः उपलब्धः अस्ति इति इतिहासकाराः वदन्ति। अस्मिन् प्रातिशाख्ये त्रयः अध्यायाः सन्ति, त्रिषु अध्यायेषु अशदश पटलानि सन्ति। तद्धि हस्तलेखस्य तस्य अन्तिमवचनेन ज्ञायते। तथा हि-

इति प्रातिशाख्येऽशदशं पटलम्। तृतीयोऽध्यायः। शाङ्खायनशाखायां प्रातिशाख्यं समाप्तम्'।

प्रातिशाख्यस्य नाम्ना एतद् शाङ्खायनप्रणीतम् इत्यनुमातुं शक्यते। एतदतिरिच्य अस्य प्रातिशाख्यस्य विषये न क्वापि किञ्चिदुपलभ्यते।

११.४.५. वाजसनेयप्रातिशाख्यम् : प्रवक्ता =कात्यायनः

शुक्लयजुर्वेदस्य प्रातिशाख्यमिदम्। प्रातिशाख्यस्य अस्य स्वरूपविषये वर्णनं नोपलभ्यते। अयं ग्रन्थः प्रकाशितः उपलभ्यते च। तत्र वर्णानां विषये किञ्चिदिव अन्तर्जाले उपलब्धम्। तथाहि -

The alphabet is listed as containing different numbers of letters in various texts. It is listed as containing 43 letters in the Shiva sutras. 63 or 64 in paniniya shiksha, 47 in the rik pratishakhya, 52 in the taittiriya pratishakhya, 65 in the vajasaneya pratishakhya and 57 in the rik tantra.

(www.swamiindology.blogspot.in 2015/07/ how many letters are in Sanskrit.html).

अनेन अवगम्यते यत् वाजसनेयप्रातिशाख्ये ६५ वर्णानाम् उल्लेखो दृश्यते इति।

प्रातिशाख्यस्य अस्य अनेकानि व्याख्यानानि उपलभ्यन्ते। अस्य प्रातिशाख्यस्य प्रवक्ता भवति आचार्यः कात्यायनः। अस्य आचार्यस्य पितुः नाम वाजसनेययाज्ञवल्क्यः इति। पितुः नामदर्शनात् पितुः नाम्ना एव आचार्येण ग्रन्थः लिखितः इति भाति।

आचार्येण बहवः ग्रन्थाः प्रणीताः विद्यन्ते। ते हि- पञ्चदशसु वाजसनेयशाखासु अन्यतमा कात्यायनी शाखा, कात्यायनशतपथब्राह्मणम्, कात्ययनश्रौतसूत्रम्, कात्यायनगृह्यसूत्रम् इति। आचार्यस्य कालः विक्रमनामसंवत्सरात् त्रिसहस्रवर्षेभ्यः प्राक् अस्ति।

११.४.६ तैत्तिरीयप्रातिशाख्यम्

इदं प्रातिशाख्यं कृष्णयजुर्वेदस्य। अस्मिन् प्रातिशाख्ये चतुर्विंशतिः (२४) अध्यायाः सन्ति। तत्र प्रथमस्य साधारणविधिः इति नाम। एवं क्रमेण 'संहिताधिकारः', 'उच्चारणकल्पः' इत्यादयः अध्यायाः सन्ति। अस्य प्रातिशाख्यस्य प्रसिद्धं व्याख्यानम् अस्ति "त्रिभाष्यरत्नम्" इति। अस्य व्याख्यानस्य लेखकः सोमयार्यः इति। अस्य प्रातिशाख्यस्य आङ्ग्लानुवादोऽपि उपलभ्यते। यस्य रचयिता भवति Prof.Whitney वर्यः।

पं.युधिश्ठिरमीमांसकानां मते इदं प्रातिशाख्यं पाणिनेः प्राक् रचितम् इति। अस्य प्रवक्ता कः इति अद्यावधि अज्ञातम् अस्ति।

११.४.७ मैत्रायणीयप्रातिशाख्यम्

कृष्णयजुर्वेदस्य प्रातिशाख्येषु अन्यतमम् इदं मैत्रायणीयम् इति। मैत्रायणीयचरणस्य एकं प्रातिशाख्यं सम्प्रत्युपलभ्यते। प्रातिशाख्यस्य अस्य उल्लेखः श्री. पं. दामोदरसातवलेकरवर्यैः सम्पादितायाः मैत्रायणीयशाखायाः प्रस्तावनायां श्रीधरशास्त्रिवारेमहोदयेन लिखितं वर्तते। प्रातिशाख्यस्य अस्य प्रवक्ता कः इति तु न ज्ञायते। अस्मिन् प्रातिशाख्ये बहूनाम् ऋषीणां नामानि उल्लिखितानि वर्तन्ते । तद्यथा- आत्रेयः, वाल्मीकिः, पौष्करसादिः, प्लाक्षिः, कौण्डिन्यः, गौतमः, साङ्कृत्यः, उख्यः, काण्डमायनः, अग्निवेश्यः, प्लक्षायणः, वात्सः, अग्निवेश्यायनः, शाङ्खायनः, शैत्यायनः, कौहलीयपुत्रः, भारद्वाजादयः।

११.४.८ चारायणीयप्रातिशाख्यम्

कृष्णयजुर्वेदस्य प्रातिशाख्येषु अन्यतमम् इदं प्रातिशाख्यं चारायणीयमिति। अस्य प्रातिशाख्यस्य प्रवक्ता चारायणीयः इति कथ्यते। तथा च उक्तं लौगाक्षिगश्ह्यसूत्रस्य व्याख्याकारेण श्रीदेवपालेन–

"तथा च चारायणिसूत्रं – 'पुरुकृतेछच्छ्रयोः' इति पुरुशब्दः कृतशब्दश्च लुप्यते। यथासङ्ख्यं छे छ्रे परतः"। (लौगाक्षिगश्ह्यसूत्रव्याख्या ५.१.१)

चारायणीयस्य अन्येऽपि ग्रन्थाः सन्ति इति अन्तर्जालस्य अध्ययनेन भवान् ज्ञातुं शक्नोति । तद्यथा– चारायणीयकामसूत्रं, चारायणीया शिक्षा, चारायणीयार्थशास्त्रमित्यादिकम्। (hindutravels.in/shastr/kamshastr/)।

चारायणीयशिक्षा काश्मीरदेशात् प्राप्ता इति 'इण्डिया एण्टीक्वेरी' इत्याख्यस्य ग्रन्थस्य रचयिता इतिहासकारः Kiel Horn इत्याख्यः स्वग्रन्थे उल्लिखितवान्।

११.४.९. सामप्रातिशाख्यम्-

सामवेदस्य प्रातिशाख्यं 'पुष्पसूत्रं' 'फुल्लसूत्रम्' इति वा नाम्ना व्यवह्रियते। तदुक्तं श्रीहरिदत्तेन –

सूत्रकारं वररुचिं वन्दे पाणिं च वेधसम्।
फुल्लसूत्रविधानेन खण्डप्रपाठकानि च ॥
वन्दे वररुचिं नित्यमूहाब्धेः पारदश्श्वनम्।
पोतो विनिर्मितो येन फुल्लसत्रशतैरलम्॥

अनेन इदमपि ज्ञातं भवति यदस्य प्रातिशाख्यस्य प्रवक्ता आचार्यः वररुचिः इति। अयं वररुचिः याज्ञवल्क्यस्य पौत्रः, कात्यायनस्य पुत्रः इति इतिहासकाराः आमनन्ति।

धातुवश्त्तिग्रन्थस्य सम्पादकः श्रीमहादेवशास्त्रिवर्यः प्रातिशाख्यस्य अस्य कर्ता आपिशलिः इति मन्यते। परन्तु अस्मिन् पक्षे प्रमाणं किमपि नोपलभ्यते।

११.४.१०. अथर्वप्रातिशाख्यम्

अथर्ववेदेन संबद्धौ द्वौ ग्रन्थौ उपलभ्येते। यथा– प्रातिशाख्यं, शौनकीयचतुरध्यायी (कौत्सव्याकरणम्) इति। सम्प्रति अथर्वप्रातिशाख्यस्य पाठद्वयम् उपलभ्यते। एकः पाठः श्री. पं. विश्वबन्धुशास्त्रिणा संपादितः, अपरश्च विद्यावारिधिना सूर्यकान्तेन संपादितः। विश्वबन्धुशास्त्रिसंपादितः पाठः 'लघुपाठः' इति नाम्ना व्यवह्रियते। सूर्यकान्तसम्पादितः पाठः 'बृहत्पाठः' इत्युच्यते। उभयोरपि पाठयोः कुत्रापि प्रवक्तुः नामोल्लेखः नास्ति। अन्यत्रापि ग्रन्थेषु अस्मिन् विषये विवरणं नोपलभ्यते। अतः अस्य प्रवक्ता कः इति अद्यावधि न ज्ञातम्।

इत्येवं क्रमेण भवान् ज्ञातानां दशानां प्रातिशाख्यानां तेषां कर्तॄणांच विषये ज्ञानं प्राप्तवान्। एवं प्रकारेण उपर्युक्तानां प्रातिशाख्यानां विषये भवान् ज्ञातवान् ।

११.५ अन्ये उपलभ्यमानाः लक्षणग्रन्थाः

प्रातिशाख्यसदृशाः केचन लक्षणग्रन्थाः अपि विद्यन्ते। इतः परं भवान् तेषां विषये ज्ञानं प्राप्स्यति। अधुना तेषां ग्रन्थानां विषयेऽपि ज्ञास्यति ये प्रातिशाख्यसदृशाः लक्षणग्रन्था भवन्ति। तेषां नामानि निम्नप्रकारेण भवति– १. अथर्वचतुरध्यायी।

२. प्रतिज्ञासूत्रम्।

३. भाषिकसूत्रम्।

४. ऋक्तन्त्रम्।

५. लघु–ऋक्तन्त्रम्।

६. सामतन्त्रम् ।

७. अक्षरतन्त्रम्।

८. छन्दोगव्याकरणम्।इदानीम् एतेषां विषये विशेषं जानातु।

११.५.१. अथर्वचतुरध्यायी

अथर्वप्रातिशाख्यविषये पठनावसरे भवान् ज्ञातवान् यत् शौनकचतुरध्यायी इति कश्चन ग्रन्थः अस्तीति। तस्यैव ग्रन्थस्य अपरं नाम अथर्वचतुरध्यायी इति। ग्रन्थस्य नामश्रवणेन एव अवगम्यते यदत्र चत्वारः अध्यायाः सन्तीति। Hvitneyमहोदयस्य कश्चन हस्तलेखः उपलभ्यते यत्र शौनकस्य नामोल्लेखः दृश्यते तस्मात् अयं ग्रन्थः शौनकविरचितः इति अनुमीयते।

ग्वालियरनगरस्य श्रीबालशास्त्रीगदरेमहोदयसङ्ग्रहात् प्राप्ते अथर्वचतुरध्यायी इति ग्रन्थस्य हस्तलेखे प्रत्येकमपि अध्यायस्य अन्तिमे भागे **'इत्यथर्ववेदे कौत्सव्याकरणे चतुरध्यायिकायाम्ख्र'** इत्येषः पाठः उपलभ्यते। कौत्सव्याकरणनाम्ना अपि कश्चन हस्तलेखः उपलभ्यते। अस्य प्रथमाध्यायस्य प्रथमपादस्य अन्ते अपि–

'इत्यथर्ववेदे कौत्सव्याकरणे चतुरध्यायिकायाम्ख्र'

इत्येषः पाठः उपलभ्यते। श्रीमतां युधिश्रिमीमांसकानां मतानुसारेण 'शौनकीयचतुरध्यायी' ग्रन्थस्य प्रवक्ता कौत्स अस्ति। अथर्ववेदस्य शौनकशाखायाः संबद्धत्वादयं ग्रन्थः 'शौनकीयविशेषणेन विशेष्यते'।

११.५.२ प्रतिज्ञासूत्रम्–

शुक्लयजुर्वेदस्य संप्रदाये 'प्रतिज्ञासूत्रम्' इति नाम्ना ग्रन्थद्वयं वर्तते। एकः कात्यायनप्रातिशाख्यसंबद्धः अस्ति, द्वितीयः ग्रन्थः कात्यायनश्रौतसूत्रसंबद्धः। एवञ्च प्रतिज्ञासूत्रस्य प्रवक्ता कात्यायनः इत्यवगम्यते। अस्य कालः विक्रमसंवत्सरात् त्रिसहस्त्रवर्षेभ्यः पूर्वमित्यनुमीयते।

श्री–अनन्तदेवः स्वकीयायां प्रतिज्ञासूत्रव्याख्यायां प्रतिज्ञासूत्रविषये लिखति–

"प्रातिशाख्यकथनानन्तरं चैतस्यावसरो यतस्तन्निरूपितकर्मनियुक्तमन्त्रेषु स्वरसंस्कारनियमावश्यं भावतयाऽनुपदिश्स्वरसंस्थानसंस्काराकाङ्क्षैस्तदथ- मयमारम्भः"।

प्रतिज्ञासूत्रनामके अस्मिन् ग्रन्थे तिस्रः कण्डिकाः सन्ति। तत्र प्रथमकण्डिकायां स्वरविशेषनियमानां वर्णनं दश्श्यते। द्वितीयायां य-ज-ष-ख-स्वरभक्तिप्रभश्त्युच्चारणानां विधानमस्ति। तश्तीयकण्डिकायां अयोगवाहानां (अनुस्वारविसर्गजिह्वामूलीयोपध्मानीययमानाम्) विशिशेच्चारणस्य विधिः प्रोक्तः।

११.५.३ भाषिकसूत्रम्

कात्यायनप्रातिशाख्यस्य परिशिशेषु भाषिकसूत्रनामकस्य ग्रन्थस्य उल्लेखः दृश्यते। भाषिकसूत्रे ग्रन्थे शतपथब्राह्मणस्य स्वरसञ्चारविषये व्याख्या कृता। तत्र तिस्रः कण्डिकाः सन्ति। अस्मिन् ग्रन्थे शतपथब्राहणस्य स्वरविधानेन सह लुप्तानां ब्राह्मणानाम् अपि विनश्स्वरसंप्रदायानां ब्राह्मणानां च चर्चा कृता विद्यते। तथा हि-

१. 'शतपथवत्' ताण्डिभाल्लविनां ब्राह्मणस्वरः(३/१५)

२. मन्त्रस्वरवत् ब्राह्मणस्वरश्चरकाणाम् (३/२५)

३. तेषां खाण्डिकेयौखेयानां चातुःस्वर्यमपि(३/२६)

४. ततोऽन्येषां ब्राह्मणस्वरः(३/२७)

११.५.४. ऋक्तन्त्रम्

ऋक्तन्त्रनामकः अयं ग्रन्थः सामवेदीयग्रन्थेषु प्रसिद्धः अस्ति। अस्मिन् ग्रन्थे सामवेदस्य राणायनीयशाखायाः स्वरविचाराः सन्धिनियमाश्च उक्ताः सन्ति। अस्य ग्रन्थस्य प्रवक्ता कः इति विषये मतभेदो दश्श्यते। केचन शाकटायनः अस्य प्रवक्ता इति वदन्ति, यथा श्री नागेशभट्टः **'ऋक्तन्त्रव्याकरणे शाकटायनोऽपि - इदमक्षरछन्दोख्र।'** (लघुशब्देन्दुशेखरे संज्ञाप्रकरणे)।

डा. सूर्यकान्तसंपादिते ऋक्तन्त्रस्यान्ते मुद्रितायां श्रीहरदत्तनामाभिधेयविदुषा प्रणीतायां सामसर्वानुक्रमण्यामपि -

ऋचां तन्त्रव्याकरणे पञ्चसङ्ख्या प्रपाठकम् ।
शाकटायनदेवेन द्वात्रिंशत् खण्डकाः स्मृताः ॥

अन्ये केचन औदव्रजिः इत्यपि। तद्यथा श्रीभट्टोजिदीक्षितः शब्दकौस्तुभे-

'तथा च ऋक्तन्त्रव्याकरणस्य छान्दोग्यलक्षणस्य प्रणेता औदव्रजिरप्य- सूत्रयत्-अनन्त्यान्यसंयोगे मध्ये यमः पूर्वस्य गुण इति।'

प्रसिद्धः इतिहासकारः पं. युधिश्रिमीमांसकः अस्य ग्रन्थस्य प्रवक्ता शाकटायनगोत्रजः आचार्यः औदव्रजिः इति कथयति।

११.५.५ लघुऋक्तन्त्रम्

पूर्वस्मिन् बिन्दौ ऋक्तन्त्रनामकस्य ग्रन्थस्य विषये ज्ञातवान् भवान्। तमेव ग्रन्थमाश्रित्य कश्चिदाचार्यः लघुतन्त्रनामकं ग्रन्थं रचितवान्। कः सः आचार्यः इत्यस्मिन् विषये कुत्रापि उल्लेखः न दश्श्यते। अयं ग्रन्थः पाणिनेः उत्तरकालिकः इति इतिहासकाराः आमनन्ति।

११.५.६ सामतन्त्रम्-

सामतन्त्रमित्येषः ग्रन्थः सामवेदसंबद्धः। अयं ग्रन्थः उपलभ्यते मुद्रितश्च वर्तते। अस्य ग्रन्थस्य प्रवक्ता कः इति विषये मतभेदः अस्ति। तद्यथा श्रीहरदत्तः सामसर्वानुक्रमण्यां लिखति।-

सामतन्त्रं प्रवक्ष्यामि सुखर्थं सामवेदिनाम्।
औदव्रजिकृतं सूक्ष्मं सामगानां सुखावहम् ॥

अनेन ज्ञायते हरदत्तस्य मते सामतन्त्रस्य प्रवक्ता भवति आचार्यः औदव्रजिः।

पं.युधिश्रिरमीमांसकमतेऽपि आचार्यः औदव्रजिः सामतन्त्रस्य प्रवक्ता भवति। परन्तु श्री.पं. सत्यव्रतसामश्रमिमहोदयस्य मते आचार्यः गार्ग्यः अस्य ग्रन्थस्य प्रवक्ता इति। तथा हि- **“सामतन्त्रं तु गार्ग्येणेति वयमुपदिशः प्रामाणिकैः”।**

अस्मिन् ग्रन्थे सामगानानां योनिभूतऋचास्थाऽक्षरविकारविश्लेषा-ऽभ्यासविरादिकर्मणां विधानमस्ति।

११.५.७ अक्षरतन्त्रम्

सामवेदसंबद्धाः बहवः ग्रन्थाः विद्यन्ते येषु ‘अक्षरतन्त्र’ नामकः कश्चन लघुकायः ग्रन्थः विद्यते। अयं ग्रन्थः पं.सत्यव्रतसाममिश्रवर्यैः प्रकाशितः। अस्य ग्रन्थस्य भूमिकायां ते लिखन्ति-

“ग्रन्थोऽयम् ऋक्तन्त्रप्रणेतुः शाकटायनस्य समकालिकेन महामुनिना भगवता आपिशलिना प्रोक्तः”।

अनेन वचनेन अक्षरतन्त्रस्य प्रवक्ता आचार्यः आपिशलिः इति तु स्पश्म्। अक्षरतन्त्रे सामगानेषु प्रपूज्यमानानां स्तोमादीनां विषये चर्चा दृश्यते।

११.५.८. छन्दोगव्याकरणम्

वाराणस्यां विद्यमानस्य सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य सरस्वतीभवन-सङ्ग्रहादये ‘छन्दोगव्याकरण’नाम्ना एकः हस्तलेखः उपलभ्यते। अस्य विवरणज्ञानार्थम् अस्य हस्तलेखस्य अध्ययने प्रवश्त्तिः कर्तव्या अस्ति। इत्येवं प्रातिशाख्यसदश्शाः ग्रन्थाः के, तेषाम् प्रवक्तारः के इत्यादिविषये ज्ञातवान् अस्ति।

११.६.१ प्रातिशाख्यानां वश्त्तिकाराः-

प्रातिशाख्यानां विषये बहुभिः वश्त्तयः लिखिताः। के ते वश्त्तिकाराः इति विषयं भवान् अग्रे जानातु।

- **ऋक्प्रातिशाख्यस्य वश्त्तिकाराः**

आत्रेयः, विष्णुमित्रः, उव्वटः, सत्ययशाः, पशुपतिनाथः इत्यादयः। बहूनां भाष्यकाराणां वश्त्तिकाराणां च नामानि नोपलभ्यन्ते।

- **कात्यायनप्रातिशाख्यस्य वश्त्तिकाराः**

उव्वटः, अनन्तभट्टः, श्रीरामशर्मा, रामाग्निहोत्री, शिवरामः इत्यादयः।

- **तैत्तिरीयप्रातिशाख्यस्य वश्त्तिकाराः**

आत्रेयः, वररुचिः, माहिषेयः, सोमयार्यः, गार्ग्यगोपालयज्वा, वीरराघवकविः, भैरवार्यः, पद्मनाभः इत्यादयः। एका 'वैदिकभूषण' 'भूषणरत्न' इति वा नाम्नी वश्त्तिः उपलभ्यते। परन्तु तस्य कर्ता कः इति न ज्ञायते।

- **सामप्रातिशाख्यम्**

सामप्रातिशाख्यस्य अजातशत्रुः, श्री-रामकृष्णदीक्षितसूरिः इत्येताभ्यां भाष्यं प्रणीतम्। अन्येषां वश्त्तिकाराणां नामानि न ज्ञायन्ते।

इत्येवमस्य पाठस्य अध्ययनेन प्रातिशाख्यस्य इतिहासं सम्यक् ज्ञातवानस्ति।

बोधप्रश्नाः

५. कतीनां प्रातिशाख्यानां नामानि उपलभ्यन्ते?

....

....

....

६. उपलभ्यमानाः लक्षणग्रन्थाः कति?

....

....

....

७. ऋग्वेदस्य ज्ञातानां प्रातिशाख्यानां नामानि लिखत।

....

....

....

८. आचार्यस्य शौनकस्य कानि नामानि प्रसिद्धानि?

....

....

....

९. आश्वलायनाचार्यस्य कालः कः?

....

....

....

१०. आचार्यस्य कात्यायनस्य कृतयः काः?

....

....

....

११. तैत्तिरीयप्रातिशाख्यस्य आङ्ग्लानुवादकः कः?

....

....

....

१२. अथर्ववेदेन संबद्धौ द्वौ ग्रन्थौ कौ?

....

....

....

१३. अक्षरतन्त्रनामकः ग्रन्थः केन प्रकाशितः?

....

....

....

१४. अक्षरतन्त्रस्य विषयः कः?

....

....

....

११.७. सारांशः

संस्कृतव्याकरणशास्त्रेतिहासः इत्यस्य ग्रन्थस्य अस्मिन् पाठे मुख्यः विषयः अस्ति प्रातिशाख्यमिति। प्रातिशाख्यशब्दस्य व्युत्पत्तिः शाखां शाखां प्रति प्रतिशाखम्। प्रतिशाखं भवं प्रातिशाख्यम्। वेदसंबन्धिव्याकरणम् उच्चारणविज्ञानं च यत्र नियम्यते सः ग्रन्थः।

कति प्रातिशाख्यानि इति उल्लेखेन सह तेषां प्रवर्क्तॄणां कालः, कृतयः इत्यादीनां विषये अस्मिन् पाठे वर्णितम्। प्रातिशाख्यसदशशानाम् अशनां (८) केषाञ्चन लक्षणग्रन्थानां विवरणं वर्तते। तेषां परिचयः लेखकानां च परिचयः अस्मिन् पाठे कृतः। वशत्तिकाराः के इत्यपि वर्णितम्।

११.८. शब्दावली

१. **प्रातिशाख्यम्** = शाखां शाखां प्रति प्रतिशाखम्। प्रतिशाखं भवं प्रातिशाख्यम्। वेदसंबन्धिव्याकरणम् उच्चारण–विज्ञानं च यत्र नियम्यते सः ग्रन्थः।

२. **पदप्रकृतिः** = पदानि एव प्रकृतयः येषु तानि। यस्मिन् प्रातिशाख्ये पदं प्रकृतिरूपेण स्वीक्रियन्ते तानि।

३. **पौरस्त्याः** = पुरे भवाः इत्यर्थः।

४. **पाश्चात्याः** = पश्चाद् भवाः इत्यर्थः।

५. **लक्षणम्** = असाधारणः धर्मः।

११.९ बोधप्रश्नोत्तराणि

१. शाखां शाखां प्रति प्रतिशाखम्। प्रतिशाखं भवः प्रातिशाख्यम्।

२. अव्ययीभावाच्च इति सूत्रेण भवार्थे ञ्यप्रत्ययः।

३. पार्षदः, पारिषदम् ।

४. सर्ववेद परिषदं हीदं शास्त्रम्, इति महाभाष्ये उक्तम् ।

५. दश(१०) प्रातिशाख्यानां नामानि उपलभ्यन्ते ।

६. अशै(८) ॠग्वेदस्य ज्ञातानां प्रातिशाख्यानां नामानि भवन्ति।

७. आश्वलायनम्, बाष्कलायनम्, शाङ्खायनम्।

८. गश्हपतिः, कुलपतिः, शौनकः, बह्वश्चसिंहः।

९. विक्रमनामसंवत्सरात् ३००० वर्षेभ्यः प्राक् ।

१०. पञ्चदशसु वाजसनेयशाखासु अन्यतमा कात्यायनी शाखा, कात्यायनशतपथब्राह्मणम्, कात्यायनश्रौतसूत्रम्, कात्यायनगृह्यसूत्रम्।

11- Prof. Whetney वर्यः।

१२. प्रातिशाख्यम्, शौनकीयचतुरध्यायी(कौत्सव्याकरणम्)।

१३. पं.सत्यव्रतसामश्रिवर्यः।

१४. अक्षरतन्त्रे सामगानेषु प्रयुज्यमानानां स्तोमादीनां विषये चर्चा दश्श्यते।

११.१० सन्दर्भग्रन्थः

व्याकरणशास्त्रेतिहासः

११.११. सहायकग्रन्थाः

(1) संस्कृत व्याकरण शास्त्र का इतिहास- पं. युधिश्िर मीमांसकः।

(2) व्याकरणशास्त्रेतिहासः - लोकमणिदहालः।

(3) संस्कृतव्याकरणशास्त्रेतिहासः - अशोकचन्द्र गौड़शास्त्री।

(4) संस्कृत शास्त्रों का इतिहास-श्री बलदेव उपाध्यायः।

११.१२ अभ्यासप्रश्नाः

क. लघूत्तरीयप्रश्नाः

१. सूत्रकारं वररुचिम्---- इति श्लोकं पूरयत।

....

२. भाषिकसूत्रे कति कण्डिकाः सन्ति?

....

३. ऋक्तन्त्रनामकः ग्रन्थः कस्य वेदस्य ?

....

४. छन्दोगव्याकरणस्य हस्तलेखः कुत्र उपलभ्यते ?

....

ख. दीर्घोत्तरीयप्रश्नाः

१. उपलभ्यमानानां प्रातिशाख्यानां नामानि लिखतु।
२. लक्षणग्रन्थाः के उपलभ्यन्ते?
३. ऋग्वेदप्रातिशाख्यस्य स्वरूपं किम्?
४. आश्वलायनाचार्यस्य विषये लिखत।
५. प्रातिशाख्यानां वश्त्तिकाराणां नामानि लिखत।

द्वादशः पाठः – पाणिन्युत्तरवर्तिनः शब्दानुशासनकर्त्तारः

पाठसंरचना

12.1 प्रस्तावना

स्वगतमत्र भवतः द्वादशे पाठे, इतः प्राग् भवान् एकादशे पाठे प्रातिशाख्यविषये ज्ञातवान्। अस्य पाठस्य शीर्षकं 'पाणिन्युत्तरवर्त्तिनः शब्दानुशासनकर्त्तारः' इति अस्ति। अस्मिन् पाठे भवान् कातन्त्राद् समारभ्य विनयसागरोपाध्यायं यावत् सर्वेषाम् आचार्याणां विषये पठिष्यति। एते आचार्यः पाणिन्युत्तरवर्तिनः भवन्ति। तेऽपि स्वबुद्धिप्रभाद्वारा व्याकरणशास्त्रं रचितवन्तः। तेषां शास्त्राणां किं महत्त्वं इत्यादिकमत्र पाठे भवान् ज्ञास्यति ।

१२.२ उद्देश्यम्

एनं पाठं पठित्वा भवान् –

१. नवीनाचार्यपरम्परां ज्ञातुं शक्ष्यति ।

२. नावीनाचार्याणां काः रचना इति बोधयितुं शक्ष्यति ।

३. आचार्याणां देशादीनां परिचयं ज्ञास्यति ।

४. नवीनाचार्याणां कृतिप्रयोजनविषये ज्ञानं प्राप्स्यति ।

५. अग्रे शोधकरणकाले तेषामुपयोगं कर्तुं शक्ष्यति ।

६. तद्विषये जनान् बोधयितुं शक्ष्यति ।

१२.३ पाणिन्युत्तरवर्त्तिनः शब्दानुशासनकर्तारः

पाणिनिपूर्ववर्तिनः आचार्यास्तु महर्षिणा केचन स्वयमेव निर्दिष्टाः। तेषां ज्ञानमपि भवत्कृते अभूत् । अधुना पाणिनिपरवर्तिभिः अनेकैः वैय्याकरणैः अनेकानि व्याकरणानि प्रणीतानि। यद्यपि सर्वेषां व्याकरणानामुपजीव्यं मुख्यतया पाणिनीयव्याकरणमेव तथापि पाणिनेरर्वाचीनानां विदुषां प्रतिभावैशद्येन किमपि वैशिष्ट्यं तेषु अस्त्येव ।

तेषु अर्वाचीनवैयाकरणेषु प्रमुखाः भवन्ति– कातन्त्रकारः, चन्द्रगोभी, क्षपणकः, देवनन्दी, वामनः, पाल्कीर्तिः, शिवस्वामी, महाराजभोजदेवः, बृद्धिसागरसूरिः, भद्रेश्वरसूरिः, वर्धमानः, हेमचन्द्रसूरिः, मलयगिरिः, क्रमदीश्वरः, सारस्वतव्याकरणकारः, वोपदेवः, पद्मनाभदत्तः इत्येवमादयः। अतः पाणिन्युत्तरवर्तिषु शब्दानुशासनकर्तृषु प्रामुख्यम्भजमानानां शाब्दिकानां परिचयः, कृतिपरिचयश्चात्र प्रस्तूयते ।

१२.३.१ कातन्त्रव्याकरणकारः

व्याकरणसंसारे कातन्त्रव्याकरणस्य स्थानमतिमहत्त्वपूर्णमस्ति। कलापव्याकरणं कौमारञ्चास्यैवापरन्नाम । अर्वाचीनाः वैयाकरणाः 'कलापः' शब्देनास्य व्यवहारं कुर्वन्ति । व्याकरणमिदं काशकृत्स्नतन्त्रस्य संक्षिप्तं रूपमस्ति ।। एतस्मिन् व्याकरणे त्रयोः भागास्सन्ति–

१. अख्यातभागः।

२. कृदन्तभागः।

३. छन्दः प्रक्रियाभागः।

वैय्याकरणेषु जनश्रुतिरियमस्ति यत् कुमारस्य कार्तिकेयस्याज्ञया आचार्यः शर्ववर्मा शास्त्रमिदं निर्ममे । इदं वक्तुं शक्यते यत् प्राचीनकाले कुमाराणां बालानां व्याकरणशास्त्रसामान्यज्ञानाय शस्त्रमिदमध्याप्यते स्म । अत एवास्य नाम 'कुमाराणमिदं कौमारम्' इति व्युत्पत्त्या 'कौमारम्' इति संवृत्तम् । कातन्त्रव्याकरणस्य रचनाकालोऽति विवादास्पदो दृश्यते । किन्तु अचार्येण युधिष्ठिरमीमांसकमहोदयेन स्वकीये 'संस्कृतव्याकरण–शास्त्र का इतिहास' इत्यभिधेये ग्रन्थे साधकबाधकयुक्तिभिः कातन्त्रव्याकरणस्य रचनाकालः वैक्रमाब्दाद् द्विसहस्रवर्षात् प्राचीनः (2000) साधितः । कातन्त्रव्याकरणस्य कर्तृत्वविषयेऽपि विवादोऽलोक्यते कथासरित्सागर–कातन्त्रवृत्तिटीकाप्रभृतिग्रन्थानुसारं कातन्त्रव्याकरणस्य आख्यातान्तभागस्य कर्ता शर्ववर्मा अस्ति । कृदन्तभागस्य कर्ता कात्यायनोऽस्ति इति कातन्त्रवृत्तिकारेण श्रीदुर्गसिंहेन सूचितम् । किन्तु तेनेदं न सूचितं कोऽसौ कात्यायनः यः कातन्त्रस्य कृदन्तभागस्य कर्ता । कातन्त्रे कृदन्तभगसमावेशानन्तरमपि तत्र अवशिष्टानि अनेकानि नैयून्यानि दूरीकर्तुं श्रीपतिदत्तः कातन्त्रपरिशिष्टं प्रणिनाय । कातन्त्रव्याकरणस्य वैशिष्ट्यवर्धनाय श्री विजयानन्दः 'कातन्त्रोत्तर'ग्रन्थं रचयामास । अमुष्य कालः सम्वत् 1200 वैक्रमाब्दपूर्वमस्ति ।

कातन्त्रव्याकरणोपरि शर्ववर्मणा 'बृहद्वृत्तिः' प्रणीता । दुर्गसिंहेन दुर्गवृत्तिः, वररुचिना दुर्घटवृत्तिः, वृत्तिः उमापतिना एका व्याख्या, जिनप्रभसूरिणा 'कातन्त्रविभ्रम' नाम्नी टीका, श्रीजगद्धरभट्टेन च कातन्त्रस्य 'बालबोधिनी' वृत्तिः प्रणीता इति ।

१२.३.२ **चन्द्रगोभी**

आचार्येण चन्द्रगोभिना पाणिनीयव्याकरणमाश्रित्यैकं नीवनं व्याकरणं चान्द्रव्याकरणाख्यं प्रणीतम् । ग्रन्थस्यास्य प्रणयने श्रीचन्द्रगोभिना पातञ्जलमहाभाष्यादपि महत् साहाय्यं गृहीतम् ।

चन्द्राचार्यस्य वंशस्य कश्चन परिचयो नोपलभ्यते। चान्द्रव्याकरणस्य प्रारम्भे यः श्लोकः उपलभ्यते तेनेदं ज्ञायते यत् चन्द्रगोभी बौद्धमतावलम्बी आसीत् । कल्हणस्य लेखानुसारं चन्द्राचार्यः काश्मीरनृपतेरभिमन्योः समकालिक आसीत् । तदाज्ञया चन्द्राचार्यः लुप्तप्रायस्य महाभाष्यस्य प्रचारमकरोत् । नवीनं व्याकरणञ्च प्रणिनाय। तेनेदं न ज्ञायते यत् चन्द्राचार्यः कस्मिन् प्रदेशे जनिं लेभे। किन्तु चन्द्राचार्यस्योणादिसूत्राणामन्तरङ्गपरीक्षया प्रतीयते यदयं बङ्गप्रदेशवास्तव्य आसीत् । कल्हणमतानुसारेणाभिमान्योः कालः वैक्रमाब्दादेकसहस्रवर्षेभ्यः पूर्वमस्ति । अत एव चन्द्राचार्यस्य कालोऽपि वैक्रमाब्दादेकसहस्रवर्षपूर्वं स्वीकर्तुं शक्यते । चान्द्रवृत्तिग्रन्थे वामनीयलिङ्गानुशासनवृत्तौ च चान्द्रव्याकरणस्य वैशिष्ट्यमिदमेव प्रदर्शितं यत् चान्द्रव्याकरणे पारिभाषिकसंज्ञाविधानाभाव एव तद् वैशिष्ट्यमस्ति । चन्द्राचार्येण स्वोपज्ञवृत्तौ उक्तम्–

'लघुविस्पष्टसम्पूर्णमुच्यते शब्दलक्षणम्'

पाणिनीयव्याकरणे येषां शब्दानां साधुत्वप्रतिपादनं वार्तिकैः महाभाष्येष्टिभिश्च विहितम्, चन्द्राचार्येण तेषां पदानां सन्निवेशः सूत्रपाठे विहितः । अत एव तेन स्वग्रन्थस्य विशेषणम् 'सम्पूर्णम्' इत्युक्तम् । चन्द्राचार्येण स्वव्याकरण-प्रणयने पातञ्जलमहाभाष्यात् पर्याप्तं साहाय्यं गृहीतम् । पतञ्जलिना प्रोक्तानां पाणिनीयसूत्राणां निर्दोषाणि न्यासान्तराणि चन्द्राचार्येण स्वव्याकरणे प्रायः स्वीकृतानि। पतञ्जलिना विहितानि सूत्रसूत्रांशप्रत्याख्यानानि च सर्वथा व्यक्तानि। तथापि चन्द्राचार्या अनेकस्थलेषु पतञ्जलिव्याख्यानं प्रामाणिकं न मत्वा अन्यान् ग्रन्थकरान् समाश्रयन्ति ।

चन्द्राचार्येण स्वव्याकरणस्य स्वोपज्ञवृत्तिः प्रणीता । बौद्धभिक्षुणा कश्यपेन 'बालबोधिनी' नाम्नी चान्द्रवृत्तिः प्रणीता । चन्द्राचार्येण धातुपाठः, गणपाठः, उणादिसूत्रम्, लिङ्गानुशासनम् उपसर्गवृत्तिः शिक्षासूत्रम्, कोष इत्येवमादयः अनेके ग्रन्था अपि प्रणीताः ।

१२.३.३ **क्षपणकः**

वैक्रमप्रथमशतके समुत्पन्नेन क्षपणकाचार्येण कस्यचन व्याकरणस्य प्रवचनं विहितमिति व्याकरणशास्त्रस्याऽनेकेषु ग्रन्थेषूपलब्धोद्धरणावलोकनेन ज्ञायते । तथाहि–

'अत एव नावमात्मानं मन्यते इति विगृह्य परत्वादनेन ह्रस्वत्वं बाधित्वा अमागमे सति 'नावं मन्ये' इति क्षपणकव्याकरणे दर्शितम्' इति।

एवमेव तन्त्रप्रदीपेऽपि 'क्षपणकव्याकरणे महान्यासे' इत्युल्लेख उपलभ्यते। कालिदासप्रणीते 'ज्योतिर्विदाभरणम्' इत्यभिधेये ग्रन्थे विक्रमसभायाः नवरत्नानां नामानि लिखितानि। तत्र क्षपणकोऽप्यन्यतमोऽस्ति । अनेकेषामैतिहासिकानां मतमस्ति यत् जैनाचार्यस्य सिद्धसेनदिवाकरस्यैव नामान्तरं क्षपणकः। स एव व्याकरणशास्त्रप्रवक्ता । क्षपणकसिद्धसेन–

दिवाकरयोरैक्यं सिद्धयेत् चेन्निश्चितरूपेण क्षपणको महाराजस्य विक्रमादित्यस्य समकालिको भविष्यति । क्षपणकेन स्वव्याकरणस्य स्वोपज्ञवृत्तिः प्रणीता **क्षपणकव्याकरणस्य** ''महान्यास'' टीकाऽपि केनचित् प्रणीता। किन्तु टीकाकारस्य नाम न ज्ञायते ।

१२.३.४ **देवनन्दी**

आचार्येण देवनन्दिना 'जैनेन्द्र' इत्यभिधेयं शब्दानुशासनं प्रणीतम् । अस्य कालः संवत् 500 वैक्रमाब्दात् पूर्वमस्ति । जैमेन्द्रव्याकरणस्य सम्प्रति द्वे संस्करणे उपलभ्येते। औदीच्यं दाक्षिणात्यञ्चेति । औदीच्यसंस्करणे प्रायेण त्रिसहस्राणि सूत्राणि, दाक्षिणात्यसंस्करणे च त्रिसहस्रोत्तरसप्तशतमितानि सूत्राणि सन्ति । दाक्षिणत्यसंस्करणे न केवलं सप्तशतसूत्राण्येवाधिकानि, किन्तु शतशः सूत्रेषु परिवर्तनं परिवर्धनमप्युपलभ्यते। औदीच्यसंस्करणस्य अभयनन्दिकृतायाम्महावृत्तौ बहूनि वार्तिकान्युपलभ्यन्ते । किन्तु दाक्षिणात्यसंस्करणे तानि वार्तिकानि प्रायेण सूत्रान्तर्गतान्येव । अत एवेदं विचारणीयं सम्पद्यते यत् कस्तावत् सूत्रपाठः पूज्यपाददेवनन्दिप्रणीतः । आचार्येण युधिष्ठिरमीमांसकमहोदयेन साधितं यत् औदीच्यसंस्करणमेव देवनन्दिप्रणीतं मूलसूत्रपाठभूतम्। दाक्षिणत्यसंस्करणञ्च जैनेन्द्रव्यकारणस्य परिष्कृतं रूपान्तरम्। तस्य वास्तविकं नाम 'शब्दावर्णवव्याकरणम्' इत्यस्ति । जैनेन्द्रव्याकरणे एकशेषप्रकरणं नास्ति । तत्रानेन नवीनाः अल्पाक्षरसंज्ञाः कल्पिताः । अतः शब्दलाघवेप्यर्थकृतगौरवात् पाणिनीयतन्त्रापेक्षया जैनेन्द्रव्याकरणं क्लिष्टम् । यद्यपि जैनेन्द्रव्याकरणस्य मुख्याधारः पाणिनीयव्याकरणम् । तथापि क्वचित् चान्द्रव्याकरणमपि समाश्रितम् । जैनेन्द्रव्याकरणस्य अनेकैः विद्वद्भिः टीकाः प्रणीताः । अत्र प्रमुखानां टीकाकाराणं नामानि प्रस्तूयन्ते–

1. देवनन्दी (सं. 500 वै.पू.) 'जैनेन्द्र'न्यासः ।
2. अभयनन्दी (सं. 174–1035 वै.) 'महावृत्तिः' ।
3. प्रभाचन्द्राचार्यः (सं.1025–1075 वै.) 'शब्दाम्भोजभाष्करन्यास' वृत्तिः।
4. अज्ञातभाष्यकारः (सं. 1200 वै.पू.) भाष्यम् ।
5. महाचन्द्रः (वै. विंशशतकम्) 'लघुजैनेन्द्र'वृत्तिः ।

आर्यश्रुतकीर्तिना (सं. 1225 वै.) जैनेन्द्रव्याकरणस्य 'पञ्चवस्तु' इत्यभिधेयः प्रक्रियाग्रन्थः प्रणीतः । विंशवैक्रमशतकीयस्य वंशीधरस्यापि जैनेन्द्रप्रक्रिया पूर्वार्धः सम्प्रति प्रकाशितः ।

१२.३.५ **वामनः**

वामनाचार्येण **'विश्रान्तविद्याधर'** इत्यमिधेयं व्याकरणं प्रणीतम्। अस्योल्लेखः आचार्येण हेमचन्द्रेण वर्धमानसूरिणा च स्वग्रन्थेषु विहितः। वर्धमानेन गणरत्नमहोदधि–व्याकरणस्यास्यनेकानि सूत्रणि समुद्धृतानि। वामनश्च 'सहृदयचक्रवर्ती' इत्युपाधिना विभूषितः। वामनस्य कालः सं. 600 वैक्रमाब्दात् पूर्वं स्वीकर्तुं शक्यते। वर्धमानप्रणीत'गणरत्नमहोदधि' ग्रन्थानुसारं वामनेन विश्रान्तविघाधरस्य **'लघ्वी, बृहती'** इत्याख्ये द्वे टीके प्रणीते। तार्किकशिरोमणिना मल्लवादिना वामनकृतव्याकरणे 'न्यास'ग्रन्थः प्रणीतः इति ।

१२.३.६ **पाल्कीर्तिः**

व्याकरणवाङ्मये 'शाकटायन'नाम्ना व्याकरणद्वयं प्रसिद्धम्। आर्षं व्याकरणम्, अर्वाचीनं

जैनव्याकरणञ्चेति । अभिनवस्यास्य शाकटायनव्याकरणस्य प्रणेतुर्वास्तविकं नाम 'पाल्यकीर्तिरस्ति'। श्रीवादिराजसूरिणा पार्श्वनाथचरिते लिखितम्–

कुतस्त्या तस्य सा शक्तिः पाल्यकीर्त्तेर्महौजसः ।
श्रीपदश्रवणं यस्य शब्दिकान् कुरुते जनान् ॥

श्लोकेस्मिन् 'श्रीपदश्रवणं यस्य' इत्यनेन संकेतः शाकटायव्याकरणस्य स्वोपज्ञाम् अमोघावृत्तिं प्रत्यस्ति। अस्याः वृत्तेः मङ्गलाचरणारम्भः **'श्रीवीरममृतं ज्योतिः'** इत्यनेन जायते । पार्श्वनाथचरितस्य पञ्जिकाटीकाकर्त्रा श्रीशुभचन्द्रेण पूर्वोक्तश्लोकव्याचक्षाणेनोक्तम्–

'तस्य पाल्यकीर्तेमहौजसः श्रीपदश्रवणं श्रिया उपलक्षितानि पदानि शाकययनसूत्राणि, तेषां श्रवणमाकर्णनम्' । अनेन स्पष्टं यत् शाकटायनव्याकरणस्य प्रणेतुर्नाम **पाल्यकीर्ति**रेवास्ति। अनेके पाल्यकीर्तिं जैनश्वेताम्बरसम्प्रदायस्य, केचन् च दिगम्बरसम्प्रदायस्य स्वीकुर्वन्ति। किन्तु पाल्यकीर्तिर्यापनीयसम्प्रदायस्यासीत् । अयं दिगम्बरश्वेताम्बरयोरन्तरालवर्ती सम्प्रदाय आसीत् ।

सम्भाव्यते यत् पाल्यकीर्तिर्महाराजस्यामोघदेवस्य सभायाः विद्वान् भवेत् । महाराजो अभोघदेवः सं. 871 वैक्रमाब्दे सिंहासनमलञ्चकार । तस्यैकं दानपत्रं सं. 924 वैक्रमाब्दस्योपलब्धम् । अतोऽयमेव समयः पाल्यकीर्तेरपि । शाकटायनव्याकरणे इष्टीनामुपसंख्यानानाञ्चावश्यकता नास्ति । सूत्रात् पृथक् किमपि वक्तव्यं नास्ति।

इन्द्रचन्द्रादिरुक्तानि सर्वाण्व्यपि शब्दलक्षणानि व्याकरणेऽस्मिन् वर्तन्ते । व्याकरणेऽस्मिन् पाल्यकीर्तिना समासान्तप्रकरणं समासप्रकरणे, एकशेषञ्च द्वन्द्वप्रकरणे पठित्वा व्याकरणस्य प्रक्रियानुसारिरचनाया बीजवपनं विहितमासीत् ।

पाल्यकीर्तिना धातुपाठः, उणादिसूत्रपाठः, गणपाठः, लिङ्गानुशासनपाठः, परिभाषापाठः, उपसर्गार्थः, तद्धितसङ्ग्रहः इत्येवमनेके ग्रन्था प्रणीताः। अथ च स्त्रीमुक्तिकेवलिभुक्तिप्रभृतय साहिग्रग्रन्था अपि प्रणीताः। काव्यमीमांसायां राजशेखरेण सूचितं यत् पाल्यकीर्तिना साहित्यविषयकोऽपि कश्चन ग्रन्थः प्रणीतः । स्वशाकटायनव्याकरणोपरि पाल्यकीर्तिना अतिविस्तृता वृत्तिः प्रणीता। या **'अमोधा'** नाम्नी प्रसिद्धा प्रभाचन्द्रेण अमोधावृत्तेः 'न्यास' नाम्नी टीका प्रणीता । शाकटायनव्याकरणस्य 'अमोघविस्तर' इत्याख्यायाः व्याख्यायाः उल्लेखः माधवीयधातुवृत्तौ (पृ.सं. 44) उपलभ्यते। तस्याः कर्तुर्नाम न ज्ञायते यक्षवर्मा अमोघावृत्तिमेव संक्षिप्य शाकटायनव्याकरणस्य 'चिन्तामणि' नाम्नी लघ्वी वृत्तिं प्रणीतवान् । श्री अभयचन्द्राचार्येण शाकटायनव्याकरणमाश्रित्य 'प्रक्रियासंग्रह' इत्याख्यः ग्रन्थः रचितः। श्रीभावसेनत्रैविद्यदेवेन ''शाकटायनटीका'' इत्याख्यः श्रीमुनिदयापालेन च 'रुपसिद्धि' इत्याख्यः प्रक्रियाग्रन्थः प्रणीतः ग्रन्थोऽयं प्रकाशितः इति ।

१२.३.७ **शिवस्वामी**

शिवस्वामी महाकविरूपेण प्रसिद्धः । तत्प्रणीतं 'कफ्फणाभ्युदय' इत्यादिकम् महाकाव्यमत्युच्चकोटेर्ग्रन्थोऽस्ति। वैयाकरणरूपेण शिवस्वामिन उल्लेखः क्षीरतरङ्गिणी–कातन्त्रगण–धातुवृत्ति–माधवीयधातुवृत्तिप्रभृतिषु ग्रन्थेषूपलभ्यते । वर्धमानः पतञ्जलिकात्यायनाभ्यां सह शिवस्वामिनं सर्वप्रथमं निर्दिशति। अपरस्मिन् स्थाने 'परः पाणिनीः, अपरः शिवस्वामी' इत्युदाहरति। अनेन प्रतीयते यत् शिवस्वामी वर्धमानदृष्टौ पाणिनिसदृशो महावैयाकरण आसीत् ।

कल्हणेन राजतरङ्गिण्यां सूचितं यत् शिवस्वामी काश्मीराधिपतेः अवन्तिवर्मणो

राज्यकाले विद्यमान आसीत् । अवन्तिवर्मणो राज्यकालः सं. 914–940 वि. यावत् वर्तते। अतः स एव कालः शिवस्वामिनोऽस्ति ।

शिवस्वामिप्रोक्तो व्याकरणग्रन्थः सम्प्रति नोपलभ्यते । पूर्वोद्धृतैरुद्धरणैर्ज्ञायते यत्

शिवस्वामिना स्वव्याकरणे काचिद् वृत्तिः प्रणीता तत्सम्बद्धधातुपाठस्याऽपि प्रवचनं विहितम्।

१२.३.८ **महाराजो भोजदेवः**

महाराजेन भोजदेवेन 'सरस्वतीकरण्ठाभरणम्' इत्यभिधेयं बृहत् शब्दानुशासनं प्रणीतम् । योगसूत्रवृत्तिप्रारम्भे तेन स्वयमेव लिखितम्–

शब्दानामनुशासनं विदधता पातञ्जलं कुर्वता
वृत्तिं राजमृगाङ्कसंज्ञकमपि व्यातन्वता वैद्यके ।
वाक्चेतोवपुषां मलः फणिभृतां भर्त्रेव येनोद्धृत
स्तस्य श्रीरणरङ्गमल्लनृपतेर्वाचो जयन्त्युज्ज्वलाः ॥

एतच्छ्लोकानुसारेण सरस्वतीकण्ठाभरण–योगसूत्रवृत्ति–राजमृगाङ्कग्रन्थानां प्रणेता एक एवेति स्पष्टं भवति ।

भोजदेवनामानोऽनेके राजानः संवृत्ताः। किन्तु सरस्वतीकण्ठाभरणप्रभृतीनां ग्रंन्थानां प्रणेता, विदुषामाश्रयदाता भोजदेवः परमारवंशीयो धाराधीश्वरश्चैव प्रसिद्धः । भोजदेवोऽयं महाराजस्य सिन्धुलस्य पुत्रो, महाराजस्य जयसिंहस्य च पिताऽऽसीत् ।

महाराजस्य भोजदेवस्यैकं दानपत्रं 1078 वैक्रमाब्दीयमुपलब्धम्। तस्योत्तराधि –कारिणे जयसिंहस्य च दानपत्रं 1112 वैक्रमाब्दीयमुपलब्धम् । अतो भोजदेवस्य कालः एकादशशतकोत्तरार्द्धम्। राज्यकालश्च 1075 वैक्रम्याब्दात् 1110 वैक्रमाब्दं यावत् सामान्यतया स्वीक्रियते ।

♦ **संस्कृतभाषायाः पुनरुद्धारकः**

महाराजो भोजदेवः स्वयं महाविद्वान् विद्यारसिको विदुषामाश्रयदाता चाऽऽसीत्। तेन लुप्तायाः संस्कृतभाषायाः पुनरेकदा समुद्धारो विहितः। तथा चोक्तं श्रीवल्लभदेवेन भोजप्रबन्धे–

चाण्डालोऽपि भवेद् विद्वान् यः स तिष्ठतु मे पुरि ।

विप्रोऽपि यो भवेन्मूर्खः स पुराद् बर्हिस्तु मे ॥

महाराजस्य भोजदेवस्यैतादृशौदार्यकारणेनैतस्य समये तन्तुवायाः काष्ठभारवाहकाश्चाऽपि संस्कृतभाषाभावमर्भज्ञाः संवृत्तः । भोजप्रबन्धानुसारेण एकदा धारानगर्या बहिर्देशात् कश्चन विद्वानागतः । तस्य निवासार्थं नगर्याः किञ्चिदपि गृहं तदा रिक्तं ताऽऽसीत् । अतो राज्यकर्मचारी एकतन्तुवायमुवाच– यत्, हे तन्तुवाय स्वगृहंरिक्तं करु। अत्रैकस्य विदुषो निवासस्य व्यवस्था भविष्यति । तन्तुवायो राज्ञो राजसदने गत्वाऽधोलिखितेषु चमत्कारपूर्णेषु शब्देषु स्वदु:खं न्यवेदयत्–

काव्यं करोमि नहि चारुतरं करोमि ।
यत्नात् करोमि यदि चारुतरं करोमि ॥

भूपालमौलिभुविमण्डितपादपीठ ।
हे साहसाङ्क, कवयामि वयामि यामि ॥

एकदा भोजराज एकं वृद्धं काष्ठभारवाहकमुवाच-
भूरिभारभराकान्त! बाधति स्कन्ध एष ते ।
अस्योत्तरे तेन वृद्धेन काष्ठभारवाहकेतोक्तम्-
न तथा बाधते राजन्! यथा बाधति बाधते ॥

अर्थाद्- हे राजन् काष्ठभारेण अहं तावद् न कष्टमनुभवामि यावद् भवतो 'बाधति' शब्देन कष्टं ज्ञायते । वस्तुतो महाराजस्य विक्रमादित्यस्य कालानन्तरं भोजराजेनैतादृशः प्रत्यत्नो विहितो, येन संस्कृतभाषा पुनस्ताकालिकजनानां लोकव्यवहारभाषा संवृता । भोजराजस्यैतादृशस्तुत्यप्रयत्नैरेव संस्कृतभाषा अद्यावधि जीविता। या च यवनानां सुदीर्धशासनकालेऽपि न विनष्टा ।

महाराजेन भोजदेवेन 'सरस्वतीकण्ठाभरणनाम्ना द्वौ ग्रन्थौ प्रणीतौ, तत्रैको व्याकरणशास्त्रविषयकोऽपरश्चाऽलङ्कारविषयकः । भोजदेवस्य 'सरस्वतीकष्ठाभरणम्' इत्यभिधेये शब्दानुशासनेऽष्टौ बृहदध्यायास्सन्ति, प्रत्यध्यायं चत्वारः पादाः सन्ति । शब्दानुशासनस्याऽस्य सम्पूर्णसूत्रसंख्या च 6411 परिमिताऽस्ति ।

प्राचीनकाले विभिन्नशास्त्रीयग्रन्थानामुत्तरोत्तरं संक्षेपात् शब्दानुशासनस्य परिभाषापाठ- गणपाठोणादिसूत्रपाठप्रभृतयो महत्त्वपूर्णाः भागा शब्दानुशासनत् पृथग्भूताः। तेषामध्ययनाऽध्यापनञ्च विलुप्तं जातम् । अत एव महाराजेन भोजदेवेनैतन्नैयून्यं दूरीकरणार्थं स्वशब्दानुशासने पुनः परिभाषापाठ-लिङ्गानुशासनोणादिपाठ-गण पाठानां यथास्थानं सन्निवेशो विहितः । भोजदेवस्य सरस्वतीकण्ठाभरणे प्रारम्भिकेषु सप्तस्वध्यायेषु लौकिकशब्दानां सन्निदेशोऽस्ति अन्तिमेऽध्याये च स्वरप्रकरणस्य वैदिकशब्दानाञ्चऽन्वाख्यानयस्ति । सरस्वतीकण्ठाभरणस्योपरि भोजराजदण्डनाथनारायभट्ट- कृष्णलीलाशुकमुनि- रामसिंहदेवप्रभृतिभि-र्विद्वद्भिष्टीकाः प्रणीताः । महाराजेन भोजदेवेन व्याकरणमतिरिच्य योगशास्त्र-वैद्यक-ज्यौतिषसाहित्यकोषादिविषयका

अनेके ग्रन्थाः प्रणीताः ।

१२.३.९ बुद्धिसागरसूरिः

आचार्येण बुद्धिसागरसूरिणा 'बुद्धिसागरापरेण 'पञ्चग्रन्थी इत्याख्यं व्याकरणम्प्रणीतम्। आचार्येण हेमचन्द्रेण स्वीयलिङ्गानुशासनविवरणे हैमाभिधानचिन्तामणि-व्याख्यायाञ्चास्य निर्देशो विहितः ।

बुद्धिसागरसूरिः श्वेताश्वरसम्प्रदायस्याऽऽचार्य आसीत् । अथ चन्द्रकुलस्य वर्धमानसूरेः शिष्यः जिनेश्वरसूरेश्च गुरुभ्राता आसीत् । बुद्धिसागरव्याकरणस्यााऽन्ते-

श्रीविक्रमादित्यनरेन्द्रकालात् साशीतिके याति समासहस्त्रे ।
सश्रीकजाबालिपुरे तदाद्यं लब्धं यथा सप्तसहस्त्रकल्पम् ॥

विद्यमानेनाऽस्यानेन श्लोकनेन ज्ञायते यद्बुद्धिसागरः सं. 1080 वैक्रमाब्दे व्याकरणग्रन्थममुं प्रणिनाय । एतच्छलोकानुसारं बुद्धिसागारव्याकरणे सप्तसहस्त्रमिताः श्लोकाः आसन् किन्तु प्रभावकचरितस्य-

श्रीबुद्धिसागरसूरिश्चक्रे व्याकरणं नवम् ।
सहस्त्राष्टकमाानं तद् श्री बुद्धिसागराभिधम् ॥

एतच्छ्लोकानुसारं व्याकरणग्रन्थेऽस्मिन् अष्टसहस्त्रश्लोकसंख्या विराजते इति ज्ञायते ।

१२.३.१० **भद्रेश्वरसूरिः**

श्री भद्रेश्वरसूरिणा 'दीपक' इत्यभिधेयं व्याकरणम्प्रणीतम् । ग्रन्थोऽयं सम्प्रत्यनुप- लब्धः । गणरत्नमहोदधिकारेण वर्धमानेनोक्तम्–

मेधाविनः प्रवरदीपककर्तृयुक्ताः ।

एतद्व्याचक्षाणेन तेनोक्तम्– दीपककर्ता भद्रेश्वरसूरिः । प्रवरश्चासौ दीपककर्त्ता च प्रवरदीपककर्ता । प्राधान्यं चास्याधुनिकवैयाकरणापेक्षया ।

भद्रेश्वरसूरिमहोदयस्य कालः सं. 1200 वैक्रमाब्दात् पूर्वं स्वीक्रियते ।

१२.३.११ **वर्धमानः**

गणरत्नमहोदधिसंज्ञकमत्यन्तमहत्त्वपूर्णग्रन्थेन वर्धमानव्याकरणस्य परिचय उपलभ्यते। किन्तु वर्धमानेन कस्यचित् स्वीयशब्दानुशासनस्य प्रवचनं विहितमिति न सम्यग् ज्ञायते । संक्षिप्तसारस्य गोपीचन्द्रटीकायाम्–

चन्द्रोऽनित्यां बृद्धिमाह । भागवृत्तिकारस्तु नित्यं बृद्ध्यभावम् । वौ श्रमेर्वा इति वर्धमानः ॥

अनेनोद्धरणेन स्पष्टम् यद् वर्धमानः किञ्चित शब्दानुशासनम्, तदनुरूपं गणपाठञ्च श्लोकबद्धं विधाय तद्व्याख्यां प्रणिनाय । वर्धमानस्य कालः सं. 1150–1225 वैक्रमाब्दः स्वीक्रियते ।

१२.३.१२ **हेमचन्द्रसूरिः**

सुप्रसिद्धेन जैनाचार्येण हेमचन्द्रसूरिणा 'सिद्धहैमशब्दानुशासनम्' नाम साङ्गोपाङ्गं बृहद्व्याकरणम्प्रणीतम् । हेमचन्द्रस्य पितुर्नाम ''चाचिगः'' 'चायः' इति वाऽऽसीत् मातुर्नाम 'पाहिणी' 'पाहिनी' इति वा आसीत् । पिता वैदिकमतानुयायी, माता च जैनधर्मतत्पराऽऽसीत्। अहमदाबादमण्डले 'धुन्धुक' स्थाने मोढवंशीयवैश्यकुले हेमचन्द्रः जन्म प्राप्तवान् । हेमचन्द्रस्य जन्मकालः कार्तिकपूर्णियां 1145 वैक्रमाब्द इत्यस्ति । हेचन्द्र चन्द्रदेवसूरिशिष्यः श्वेताश्वरसम्प्रदायान्तर्गतवज्रशाखायाः आचार्य आसीत् ।

हेचन्द्रप्रणीतं सिद्धहेमशब्दानुशायनं संस्कृतप्राकृतोभयभाषयोर्व्याकरणमस्ति । प्रारम्भिकेषु सप्तस्वध्यायेषु 28 पादेषु संस्कृतभाषायाः व्याकरणमस्ति । तत्र 3566 मितानि सूत्राणि सन्ति। अष्टमेऽध्याये प्राकृतिकसूत्राणि सन्ति। शौरसेनीमागधी–पैशाची चूलिकापैशाची–प्रभृतीनामपभ्रंशशब्दानामनुशासनमस्ति । अष्टमेऽध्याये 1119 मितानि सूत्राणि सन्ति। एवमनेकविध प्राकृतभाषाणां व्याकरणं सर्वप्रथमं हेचन्द्रेणैव प्रणीतम् । हैमव्याकरणस्य क्रमः प्राचीनशब्दानुशासनसदृशो नास्ति । अस्य रचना तन्त्रवत् प्रकरणानुसारिणी वर्तते । तत्र यथाक्रमं संज्ञा–स्वरसन्धि–व्यञ्जनसन्धि–नाम–कारकषत्व–स्त्रीप्रत्यय–समास–आख्यात–कृदन्त–तद्धितप्रकरणानि सन्ति । हेमचन्द्रेण प्रणीताः व्याकरणस्याऽन्ये ग्रन्थाः इमे सन्त –

1. हैमशब्दानुशासनस्य स्वोपज्ञा लघ्वी वृत्तिः (6000 श्लोकपरिमाणवती)।
2. मध्यवृत्तिः (12000 श्लोकपरिमाणवती) ।

3. बृहती वृत्तिः (18000 श्लोकपरिमाणवती) ।

4. हैमशब्दानुशासनस्य बृहन्न्यासः ।

5. धातुपाठस्तस्य च 'धातुपारायण' नाम्नी व्याख्या ।

6. गणपाठस्तस्य वृत्तिश्च ।

7. उणादिसूत्रपाठस्तस्य च स्वोपज्ञा वृत्तिः ।

8. लिङ्गानुशासनम्, तस्य वृत्तिश्च ।

हैमशब्दानुशासनस्योपरि अनेकैः विद्वद्भिः टीकाः टिप्पण्यश्च प्रणीताः ।

१२.३.१३ **मलयगिरिः**

जैनाचार्येण मलयगिरिणा 'शब्दानुशासनम् इत्याख्यमेकं साङ्गोपाङ्गं व्याकरणं प्रणीतम् । शब्दानुशासनमिदं 2022 वैक्रमाब्दे प्रकाशितम् । अस्य सम्पादकेन श्री पं. वेचरदासजीवराजदोशी महोदयेनाऽऽचार्यमलयगिरेर्यः परिचयः स्वभूमिकायां वर्णितः स एवाऽत्र संक्षेपेणोपस्थाव्यते ।

मलयगिरिराचार्यो मूलतः वैदिकमतानुयाायिब्राह्मणकुलोत्पन्न आसीत् । सः द्वादशवर्षावस्थायां सन्यासं ग्रहीतवान् । अनुमानस्याऽस्याधारः नाम्नोऽन्ते प्रयुक्तो 'गिरि' शब्दः। सन्यासस्य सप्तवर्षानन्तरं मलयरिरिजैनः साधुः संवृत्तः स्वगुरोनिर्देशः तेन क्वचिदपि न विहितः । मलयगिरेः कालः सामान्यतया सं. 1188-1250 वैक्रमाब्दः स्वीक्रियते ।

आचार्ययलयगिरिः स्वशब्दानुशासनं प्रक्रियाक्रमानुसारेण सन्धि-नामाख्यात-कृदन्त-तद्धितेषु भागेषु विभज्य प्रणिनाय । प्रतिविभागं पादसंज्ञका अवान्तर- विभागास्सन्ति। तत्र ग्रन्थे 41 मिताः पादास्सन्ति । मलयगिरिप्रणीतायाः कल्पवृत्तेः पूर्तिः क्षेमकीर्तिना विहिता । तत्राऽस्य शब्दानुशासनस्योल्लेखः 'मुष्टिव्याकरणनाम्ना विहितः । मलयगिरिणाचार्येणाऽपि स्वशब्दानुशासनेन सह वृत्तिः प्रकाशिता । मलयगिरिप्रणीतशब्दानुशासनस्य तद्वृत्तेश्च परिमाणम् पञ्चसहस्त्रश्लोकात्मकमस्ति । मलयगिरिणा शब्दानुशासनसम्बद्धाः उणादि-धातुपारायण-गणपाठ-लिङ्गानुशासनग्रन्थाः, जैनमतसम्बद्धाः नवागमानां हरिभद्र- सदृशानामाचार्याणां ग्रन्थानां वृत्तिग्रन्थाश्च प्रणीताः ।

१२.३.१४ **क्रमदीश्वरः**

क्रमदीश्वरेण 'संक्षिप्तसार' इत्याख्यं व्याकरणं प्रणीतम्, यत् सम्प्रति तत्परिष्र्कतुः जुमरनन्दिनोनाम्ना 'जौमर' नाम्ना प्रसिद्धः । क्रमदीश्वरेण स्वीयव्याकरणस्य 'रसवती' नाम्नी टीकाऽपि प्रणीता। तस्या एव वृत्तेः जुमरनन्दिना परिष्कारो विहितः । गोपीचन्द्रेण संक्षिप्तसारस्य टीका प्रणीता । तेन सूत्रपाठेन सह उणादिपरिभाषापाठयोरपि टीके प्रणीते जौमरव्याकरणस्य परिशिष्टं प्रणीतम् । लन्दननगरस्थइण्डियाआफिसपुस्तकालये 836 संख्याङ्कित एको हस्तलेख उपलभ्यते, यत्र ' गोपीचन्द्रकृत जौमरव्याकरणपरिशिष्ट' इत्युल्लिखितमस्ति। गोपीचन्द्र-कृतटीकोपरि न्यायपञ्चानन-तारकपञ्चानन-चन्द्रशेखरविद्यालङ्कार-वंशीवादन-हरिराम- गोपालचक्रवर्त्तिप्रभृतिभिः विद्वद्भिष्टीकाः प्रणीताः। क्रमदीश्वरस्य कालः सं. 1300 वैक्रमान्दात् पूर्व स्वीक्रियते ।

१२.३.१५ **सारस्वतव्याकरणकारः**

सारस्वतव्याकरणविषये प्रसिद्धमस्ति यत् अनुभूतिस्वरूपाचार्यस्य मुखात् वृद्धावस्थाकारणेन दन्तविहीनत्वात् कस्याञ्चिद् विद्वत्सभायां पुंसु इत्यस्य स्थाने 'पुंक्षु' इत्यपशब्द उच्चरितः । विद्वद्‌भिरपशब्दप्रयोगस्योपहासे विहिते अनुभूतिस्वरूपः उक्तापशब्दास्य साधुत्वज्ञापनार्थं । वाग्देवीं पूजयामास । प्रसन्ना भूत्वा सरस्वती तस्मै 700 सूत्रणि दत्तवती तदाश्रित्य अनुभूतिस्वरूपाचार्येणाऽस्य व्याकरणस्य रचना विहिता । सरस्वत्यादेव्या मूलसूत्राणां प्राप्तत्वादस्य व्याकरणस्य 'सारस्वत' इति नाम संवृत्तम् ।

यद्यपि सारस्वतव्याकरणस्यान्ते प्रायः 'अनुभूतिस्वरूपाचार्यविरचिते' इति पाठ उपलभ्यते, तथापि तस्य-

प्रणम्य परमात्मानं बालधीवृद्धिसिद्धये ।
सरस्वतीमृजुं कुर्वे प्रक्रियां नातिविस्तराम् ॥

इत्यनेन प्रारम्भिकेन श्लोकेन ज्ञायते यत् अनुभूतिस्वरूपाचार्योऽस्य व्याकरणस्य मूललेखको नास्ति । स तु तत्प्रक्रियां सरलीकरोति । क्षेमेन्द्रेण स्वकीय 'सारस्वतप्रक्रियाया' अन्तिमे भागे लिखितम्-

अनेन प्रतीयते यत् सारस्वतसूत्राणां मूललेखकः 'नरेन्द्राचार्य' नामा वैयाकरणोऽस्ति। अमरभारतीनामाभिधेयेनाऽन्येन टीकाकारेणाप्युक्तम्-

यन्नरेन्द्रनगिरिप्रभाषितं यच्च वैमलसरस्वतीरितम् ।
तन्मयाऽत्र लिखितं तथाधिकं किञ्चिदेव कलितं स्वया धिया ॥

श्री विट्ठलाचार्येणाऽपि प्रक्रियाकौमुद्याष्टीकायां नरेन्द्राचार्योऽनेकवारं समुद्धृतः ।

उपर्युक्तैः प्रमाणैरिदं स्पष्टं यत् नरेन्द्राचार्यैः किञ्चित् सारस्वतव्याकरणमवश्यं प्राणिनाय, यप्यद्यवधि मूलरूपेण नाऽवाप्तम् । इदमप्यवधेयं यद् वर्तमानसारस्वव्याकरणस्य प्रथमवृत्तिः तद्धित्तभागपर्यन्ताऽस्ति । एतावत्येव जनश्रुतौ प्रसिद्धा सप्तशतसूत्रसंख्या सम्पूर्णा जायते । अत एतेषां सप्तशतसूत्राणां प्रणेता नरेन्द्राचार्यो भवितुमर्हति । अथ च सारस्वतव्याकरणस्य प्रथमवृत्तेरन्ते अनुभूतिस्वरूपस्य नाम न प्राप्यते, द्वितीयतृतीयवृत्त्योरन्ते च 'इति .... अनुभूतिस्वरूणचार्यविरचितायां ....समाप्तः' इति पाठ उपलभ्यते । अत इयं सम्भावना युक्तियुक्ता प्रतीयते यत् सारस्वतव्याकरणस्य प्रथमः सप्तशतसूत्रान्मको भागः नरेन्द्राचार्यप्रणीतः शेषभागश्च अनुभूतिस्वरूपाचार्यविरचितः स्यात् ।

सारस्वतव्याकरणस्योपर्यनेकैर्विद्वद्भिष्टीकाः प्रणीताः। क्षेमेन्द्रेण (सं. 1260 वै., 'टिप्पण' नाम्नी लघ्वी व्याख्या, धनेश्वरेण च (सं. 1275) सारस्वतस्य 'क्षेमेन्द्रटिप्पण-खण्डन' नाम्नी टीका प्रणीता । अनुभूतिस्वरूपाचार्येण (सं. 1300 वि.) सारस्वतप्रक्रिया, अमृतभारती महोदयेन (सं. 1550 वै. पू.) सारस्वतस्य सुबोधिनी नाम्नी टीका, पुञ्जराजेन (सं. 1550 वै.) च 'प्रक्रिया' नाम्नी टीका प्रणीता। श्री सत्यप्रबोधेन (सं. 1556 वै.पू.) सारस्वतस्य 'दीपिका' नाम्नी, माधवेन (सं. 1591) सिद्धान्तरत्नावली नाम्नी, श्री चन्द्रकीर्तिना (सं. 4600 वै.) 'सुबोधिका' दीपिका वा नाम्नी टीका प्रणीता । श्रीरघुनाथेन सारस्वतस्य 'लघुभाष्यम्' प्रणीतम् । मेघरत्नेन 'दीपिका' नाम्नी व्याख्या प्रणीता । श्रीमण्डनेन सारस्वतस्यैका टीका प्रणीता । श्रीवासुदेव भट्टेन 'प्रसाद'नाम्नी, श्रीरामभट्टेन विद्वत् प्रबोधिनी नाम्नी, श्रीकाशीनाथभट्टेन भाष्य नाम्नी, श्रीभट्टगोपालेन च 'सारस्वतव्याख्या' नाम्नी टीका प्रणीता । श्री सहजकीर्तिना 'प्रक्रियाकर्तिक' नाम्नी श्री हंस विजयगणिना च शब्दार्थचन्द्रिकानाम्नी

टीका प्रणीता। श्रीजगन्नाथनामाभिधेयविदुषा सारस्वतस्यैका टीका प्रणीता। तस्य ग्रन्थो नोपलभ्यते। तस्य निर्देश: 'धनेन्द्र' नामाभिधेयटीकाकारेण विहित: । तस्या: टीकाया: नाम 'सारप्रदीपिका' इत्यस्ति । श्रीतर्कतिलकभट्टाचार्येण सारस्वतस्यं रूपान्तरं विहितं तस्य च स्वयं व्याख्या प्रणीता । श्री रामाश्रमेणाऽपि सारस्वतस्य रूपान्तरं विधाय तस्य 'सिद्धान्तचन्द्रिका' नाम्नी व्याख्या प्रणीता । तेनैव स्वटीकाया: संक्षेपभूतलघुसिद्धान्तचन्द्रिकाग्रन्थस्योपरि लोकेशकरेण 'तत्त्वदीपिका' सदानन्देन 'सुबोधिनी' जिनेन्द्रेण च 'सिद्धान्तरन' नाम्नी टीका प्रणीता । डा. वेल्वाल्करमहोदयमतानुसारं सारस्वतव्याकरणोपरि हर्षकीर्तिना तरङ्गिणी व्याख्या प्रणीता । ज्ञानतीर्थेन कृत्तद्धितोणाद्युदाहरणविषये, माधवेन च सारस्वतशब्दविषये ग्रन्थ: प्रणीत: इत्येवमनेकै: विद्वद्भि: टीका: लिखिता: ।

१२.३.१६ **बोपदेव:**

बोपदेदेन मुग्धबोध' इत्यभिधेयं लघुतन्त्रं प्रणीतम् । बोपदेवस्य पितुर्नाम केशव: गुरोश्च नाम धनेश्वर आसीत् । बोपदेवस्य जन्मभूमिराधुनिकदौलताबादमण्डलं निकषा आसीत् ।

बोपदेवेन 'कविकल्पद्रुभ'नाम्ना धातुपाठ: सग्रंहीत:, तस्य व्याख्याऽपि प्रणीता। तस्या: नाम 'कामधेनु': इत्यस्ति । तथा च तेन मुक्ताफल-हरिलीलाविवरण-शतश्लोकी-हेमादिप्रभृतयो नाना ग्रन्था अपि प्रणीता: । बोपदेवस्य काल सं. 1325-1370 वैक्रमाब्दं यावत् स्वीक्रियते ।

बोपदेवप्रणीत मुग्धबोधस्योपर्यनेकैर्विद्वद्भि: टीका: प्रणीता: । श्रीनन्दकिशोरभट्टेन (सं. 1455 वै.) मुग्धबोधस्य परिशिष्टसहिता टीका प्रणीता । श्रीविट्ठलेन प्रक्रियाकौमुदीप्रसादे मुग्धबोधप्रदीप' नाम्नी काचिद् व्याख्या समुधृता । सा नन्दकिशोरकृता अन्यकृता वेति न सम्यग् ज्ञायते । श्री रामानन्द-देवीदास-काशीश्वर-विद्यावागीश-रामभद्रविद्याशङ्कर-भोलानाथ-प्रभृतिभिर्मुग्धबोधस्य टीका: प्रणीता: । विद्यानिवास-दुर्गादासविद्यावागीश महोदयाभ्यामपि मुग्धबोधस्य टीके प्रणीते । एतदतिरिक्तं लन्दननगरस्य इण्डिया आफिसपुस्तकालयसूचीपत्रे निम्नांकितटीकाहस्तलेखा: उपलभ्यन्ते-

1.	श्रीरामशर्मा	-	-	हस्तलेखसंख्या 853
2.	श्रीकाशीश:	-	-	हस्तलेखसंख्या 856
3.	श्रीगोविन्दशर्मा	शब्ददीपिका	-	हस्तलेखसंख्या 857
4.	श्रीवल्लभ:	बालबोधिनी	-	हस्तलेखसंख्या 861
5.	श्रीकार्तिकेय:	सुबोधा	-	हस्तलेखसंख्या 862
6.	श्रीमधुसूदन:	मधुमती	-	हस्तलेखसंख्या 869

डा. वेल्लवाल्करमहोदयमतानुसारं नन्दकिशोर-काशीश्वर-रामतर्कवागीश प्रभृतिभिर्विद्वद्भिर्मुग्धबोधस्य परिशिष्टानि प्रणीतानि । तत्र श्रीरामतर्कवागीशेनोणादिवर्णक्रमसूची निर्मिता रामचन्द्रतर्कवागीशेन च परिभाषापाठस्य वृत्ति: प्रणीता ।

१२.३.१७ **पद्मनाभदत्त:**

पद्भनाभदत्तेन 'सुपद्म' इत्यभिधेयं संक्षिप्तं व्याकरणं प्रणीतम् । अस्योणादिवृत्तौ 'सुपद्मानाभ' इति नाम उपलभ्यते ।

पद्मनाभस्य पितुर्नाम श्रीदामोदरदत्तः, पितामहस्य च नाम श्रीदत्त आसीत् । पद्मनाभदत्तस्य कालः सं. 1408 वै. स्वीक्रियते ।

पद्यनाभदत्तेन स्वीयपरिभाषावृत्तौ येषां स्वप्रणीतानां ग्रन्थानामुल्लेखो विहितस्तेषां नामानि प्रस्तूयते–

1. सुपद्मपञ्जिका ।
2. प्रयोगदीपिका ।
3. उणादिवृत्तिः ।
4. धातुकौमुदी ।
5. यङ्लुग्वृत्तिः ।
6. गोपालचरितम् ।
7. आनन्दलहरीटीका ।
8. छन्दोरत्नम् ।
9. आचारचन्द्रिका ।
10. भूरिप्रयोगकोशः ।
11. परिभाषावृत्तिः ।

श्रीपद्मनाभदत्तेन स्वव्याकरणस्योपरि स्वयमेव 'पञ्जिका' नाम्नी टीका प्रणीता। तथा च विष्णुमिश्र–श्रीधरचक्रवर्ति–रामचन्द्र–काशीश्वर प्रभृतिभिर्विद्वद्भिरपि सुपद्मस्य टीकाः प्रणीताः ।

१२.३.१८ अन्ये वैयाकरणाः

अन्येऽपि केचन वैयाकरणाः भवन्ति येषां नामानि ग्रन्थाश्च एवं भवन्ति ।

नाम	–	**ग्रन्थनाम**
१. शुभचन्द्रः	–	चिन्तामणिव्याकरणम्
२. भरतसेनः	–	द्रुतबोधव्याकरणम्
३. रामकिंकरः	–	आशुबोधव्याकरणम्
४. शिवप्रसादः	–	शीघ्रबोधव्याकरणम्
५. काशीश्वरः	–	ज्ञानामृतव्याकरणम्
६. रूपगोस्वामी	–	हरिनामामृतव्याकरणम्
७. नरहरिः	–	बालबोधव्याकरणम्

इत्येवं प्रकारेण इतिहासग्रन्थे अन्ये त्रयोदश वैयाकरणाः स्मृताः सन्ति ।

बोधप्रश्नाः

1. वामनस्य कालः कः?

.... ।

2. वामनस्य कृतयः कति?

....

.... ।

3. बुद्धिसामरसूरेः कालः कः?

.... ।

4. सारस्वतव्याकरणकारः कः?

.... ।

5. कातन्त्रव्याकरणस्य अपरं नाम किम् ?

.... ।

6. चान्द्रव्याकरणस्य कर्ता कः ?

.... ।

7. सिद्धहैमानुशासनम् इति केन रचितम् ?

.... ।

१२.४ सारांशः

इतः पूर्वं भवान् प्रातिशाख्यविषये पठितवान्, तथा च अस्य पाठस्य शीर्षकं 'पाणिन्युत्तरवर्त्तिनः शब्दानुशासनकर्तारः' वर्तते, तदनुसारं पाणिन्युत्तरवर्त्तिनाम् आचार्याणां वर्णनमत्र अस्ति। अत्र कातन्त्राद् समारभ्य पद्मनाभदत्तं यावत् शब्दानुशासनकाराणां परिचयः वर्तते। एवञ्च तेषां वंशस्य कालस्य अथ च कृतीनामपि परिचयं भवान् ज्ञातवान् । तत्र भवान् ज्ञातवान् यत् कातन्त्रव्याकरणम् अर्वाचीनव्याकरणेषु अतिमहत्त्वपूर्णम् । अस्य नामान्तरं कौमारं भवति । शर्व वर्मा अस्य लेखको भवति, कार्तिकेयकुमारप्रसादात् इदं व्याकरणं प्राप्तम् ।

महाराजेन भोजेनापि व्याकरणं रचितम्, अनेन संस्कृतस्य पुनरुद्धारः कृतः । हेमचन्द्रसूरिणा सिद्धहैमशब्दानुशासनं रचितम् । एवं प्रकारेण अन्यव्याकरणविषयेऽपि ज्ञातवान् इति ।

12.5 शब्दावली

१. **कौमारम्** – कुमारात् कार्तिकेयात् आगतम्, कौमारम् – तत आगत इत्यण् ।

२. **चान्द्रम्** – चन्द्रेण – चन्द्रगोमिना कृतं चान्द्रं व्याकरणम् ।

12.6 बोधप्रश्नोत्तराणि

1. वामनस्य कालः 600 वैक्रमाद् पूर्वं वर्तते ।
2. वामनस्य टीकारूपेण कृतिद्वयम्

   (1) लघ्वी (2) वृहती ।
3. बुद्धिसणरसूरेः 1080 वैक्रमादो अस्ति ।
4. सारस्वतव्याकरणकारः अनुभूतिस्वरूपाचार्यः अस्ति ।
5. कातन्त्रव्याकरणस्य अपरं नाम कौमारव्याकरणम् ।
6. चान्द्रव्याकरणकर्ता चन्द्रगोमी भवति ।
7. सिद्धहैमानुशासनं हेमचन्द्रसूरिणा रचितम् ।

12.7 सन्दर्भग्रन्थः

1. व्याकरणशास्त्रेतिहासः ।

12.8 सहायक ग्रन्थाः

1) व्याकरणशास्त्रेतिहासः, लोकमणिदाहलः।

2) संस्कृतव्याकरणशास्त्रेतिहासविमर्शः- डॉ. अशोकचन्द्रगौडशास्त्री।

3) संस्कृत-वाङ्मय का बृहद् इतिहास- पद्मभूषण आचार्य बलदेव उपाध्यायः।

4) संस्कृत व्याकरण शास्त्र का इतिहास- युधिष्ठिर मीमांसकरामलाल

12.9 अभ्यासप्रश्नाः

क- लघूत्तरीयप्रश्नाः

1. कातन्त्रकारस्य कालः कः?

   .... ।
2. वामनस्य कृतयः कति सन्ति?

   .... ।
3. शिवस्वामिनः कालः कः?

   .... ।
4. मलयगिरेः कृतयः कति सन्ति?

   .... ।
5. वर्धमानस्य वंशः कः?

   .... ।

6. क्रमदीश्वरस्य पिता कः?

.... ।

7. महाराजभोजदेवस्य पितुर्नाम किम्?

.... ।

8. पद्मनाभस्य किं व्याकरणम्?

.... ।

9. हेमचन्द्रसूरेः कालः कः?

.... ।

ख. दीर्घोत्तरीय प्रश्नाः

1. कौमारव्याकरणमधिकृत्य एकः लघुपरिचयः देयः ।
2. सिद्धहैमशब्दानुशासनमधिकृत्य लघु नबन्धः लेख्यः।

___◆___

त्रयोदशः पाठः – खिलपाठाः

पाठसंरचना

१३.१ प्रस्तावना

इदानीं भवान् व्याकरणशास्त्रेतिहासविषये पर्याप्तं ज्ञातवान्। तत्र भवान् गतेषु पाठेषु पाणिनिपूर्वतनानां वैयाकरणानां, पश्चाद्भाविनां वैयाकरणानां कालकृतिविषये ज्ञातवान्। अस्मिन् पाठे खिलपाठाः के भवन्ति, के च तत्कर्तारः इति विषये ज्ञानं प्राप्स्यति। तत्र कः खिलशब्दार्थः, खिलपाठेषु धातुपाठादीनां कर्तारः के इति ज्ञास्यति। सामान्यतया तेषां कालादिविषयेऽपि भवतः ज्ञानं भविष्यति ।

१३.२ उद्देश्यम्

एनं पाठं पठित्वा भवान् –

१. खिलशब्दार्थं बोद्धुं समर्थो भविष्यति ।

२. तत्र खिलपाठमध्ये केषां केषां गणना भवतीति ज्ञातुं समर्थो भविष्यति ।

३. धातुपाठगणपाठादीनां खिलपाठानां कर्तारः के भवन्ति इति ज्ञातुं प्रभविष्यति।

४. खिलपाठकाराणां देशकालादिज्ञानं कर्तुं शक्ष्यति ।

१३.३ व्याकरणस्य खिलपाठाः तद्व्याख्यातारश्च

यथा वेदस्य व्याकरणादीन्यङ्गानि भवन्ति, तद्वत् व्याकरणस्यापि अङ्गानि भवन्ति। व्याकरणस्य पञ्च अङ्गानि भवन्ति । सूत्रपाठः, धातुपाठः, गणपाठः, उणादिपाठः लिङ्गानुशासनपाठश्च इति । पुरा पञ्चाङ्गं व्याकरणमुपदिश्यते स्म । अधुना बुद्धिह्रासमवलोक्य एकत्रैव तत् सर्वं नोपदिश्यते । अतः एतेषामङ्गानां पृथक्तया उपदेशः कर्तव्यो भवति। अत

एव धातुपाठादीन्यङ्गानि शब्दानुशासनस्य खिलपाठत्वेन स्मृतानि सन्ति । अत एव धातुपाठादीनां कर्तारः के इति जिज्ञासायाम् अयं पाठः समारब्धः। अधस्तात् भवान् तेषां विषये क्रमेण ज्ञास्यति इति ।

१३.३.१ **खिलशब्दार्थः**

खिलशब्दः अनेकार्थकः अस्ति । शतपथब्राह्मणानुसारं शाङ्ख्यायनब्राह्मणानुसारं च खिलशब्दस्य अर्थः अस्ति वन्ध्या भूमिः । वैदिकवाङ्मये खिलशब्दस्य अर्थः अस्ति– स्वशाखानधीत स्वशाखीयकर्मोपयोगी परशाखीयमन्त्रसंग्रहः । परिशिष्टार्थम् अपि वदति खिलशब्दः। कृत्स्नार्थवाची नञ्समासघटितः अखिलशब्दः यः अस्ति तस्य खिलशब्दस्य अर्थः अस्ति अवयवः= भागः ।

काशिकाकारः ब्रूते यत्– उपदिश्यते अनेनेति उपदेशः, शास्त्रवाक्यानि सूत्रपाठः खिलपाठश्च । काशिकायाः व्याख्यायां न्यासकारः जिनेन्द्रबुद्धिः लिखति– खिलपाठो धातुपाठः चकारात् प्रातिपदिकपाठश्च । भर्तृहरिः उणादिपाठस्य कृतेऽपि खिलशब्दस्य प्रयोगं कृतवान् अस्ति । अत एव खिलशब्दात्– धातुपाठस्य, गणपाठस्य, उणादिपाठस्य, लिङ्गानुशासनस्य च ग्रहणं भवति । यदि खिलशब्देन एतेषां चतुर्णां ग्रहणं भवति तर्हि धातुपाठाादयः पृथक्पृथक् कथं प्रोक्ताः सन्ति ? अत उच्यते– अतिप्राचीनकाले धातुपाठादयः समस्तखिलपाठाः, शब्दानुशासनस्य अन्तर्गताः आसन् । अनन्तरं यदा मनुष्याणां वयसि अवधारणाशक्तिषु च ह्रासता समागता, तदा समस्तविद्याग्रन्थानां संक्षेपणम् आरब्धम् । अतः प्रधानभूतशब्दानुशासनस्य लाघवार्थं खिलपाठानां सूत्रपाठात् पार्थक्यमभवत्। एतस्मात् एव कारणात् सूत्राध्ययनस्य अपेक्षया खिलपाठानाम् अध्ययने ह्रासता आगता ।

१३.३.२ **धातुपाठः तद्व्याख्यातारश्च**

वैयाकरणमतानुसारं शब्दः त्रिप्रकारकः भवति । धातुजः, अधातुजः नामजश्च। तर्हि सर्वप्रथमं प्रश्नः अयम् उदेति यत्– धातुः कः? उत्तरम्– दधाति विविधं शब्दरूपं यः स धातुः । अर्थात् यः शब्दानां विविधरूपं धारयति धरति वा स धातुः । विभिन्नशब्दरूपान् यः धारयति सः मूलशब्दः धातुरिति । भगवता पाणिनिना एतद्विषये उक्तम् "भूवादयो धातवः" क्रियावाचिनो भू इत्यादयः धातुसंज्ञकाः भवन्ति। भ्वाद्यदादिगणेषु ये पठिताः अथ च क्रियावाचकाः ते धातुसंज्ञकाः भवन्ति। धातुपाठे ये धातवः पठिताः सन्ति तेषु धातुषु अनेके एतादृशाः अपि सन्ति येषां लोके तथैव प्रयोगः भवति । यथा–

पुष्प–शम–दम–व्यय–वृक्ष–शूर–वीर–हल–स्थल–स्थूल–कुल–बल–वासादयः । धातुपाठे ये धातवः उक्ताः सन्ति ते धातवः तु लोके प्रयुज्यते एव, ततोऽपि ये नामशब्दाः (प्रातिपदिकानि) सन्ति तेषु अपि आचाराद्यर्थेषु क्विप्– क्यच्–क्यङादिप्रत्ययान् संयोज्य धातुनिर्माणं भवति । तेऽपि धातवः एव । यथा–

अश्वति अश्वीयति अश्वयायते । बल्लभदेवस्य व्याख्यायां शिशुपालबधे एकः प्राचीनश्लोकः समुद्धृतोऽस्ति ।

शत्रन्त-क्विबन्तानां कसन्तानां तथैव च ।
तृजन्तानां तु लिङ्गानां धातुत्वं नोहन्यते ॥

इत्थं धातुस्वरूपावगमानन्तरं धातुव्याख्यातृविषयकं चर्चां कुर्मः । अत्र भवान् जानतु यत् ये ये आचार्याः शब्दानुशासनस्य प्रवचनं कृतवन्तः ते ते स्व–शास्त्र–सम्बद्धं

प्रकृति-प्रत्ययांशं दर्शयितुं धातुपाठस्य अपि प्रवचनं कृतवन्तः सन्ति । शब्देषु प्रकृति-प्रत्यय-रूप-विभागस्य कल्पना सर्वप्रथमम् आचार्येण इन्द्रेण कृता । अतः इन्द्रः तदुत्तरवर्तिनः येऽपि वैयाकरणाः आसन् ते सर्वे अपि धातुपाठस्य प्रवचनं कृतवन्तः इति निश्चप्रचम् । इदानीं तेषां धातुपाठकाराणां वर्णनं भवति येषां धातुपाठः सर्वथा स्पष्टतया च ज्ञातः अस्ति ।

- **इन्द्रः**

शब्देषु प्रकृति-प्रत्यय-विभागं सर्वप्रथम् आचार्यः इन्द्रः कृतवान् । प्रत्याहार-सूत्रेषु नन्दिकेश्वरेण काशिकायां तद्व्याख्यानं दत्तं तस्य व्याख्यानस्य उपमन्युकृत-तत्त्वविमर्शिनी टीकायां लिखितमस्ति यत्- तथा चोक्तमिन्द्रेण-

अन्त्यवर्णसमुद्भुताः धातवः परिकीर्तिताः ॥

एतेन श्लोकांशेन सिद्ध्यति इन्द्रः प्रथमः अस्ति धातुपाठप्रवक्ता । किन्तु तद्धातूनां किं स्वरूपमासीत् इति वक्तुं न शक्यते।

- **वायुः**

तैत्तिरीयसंहितायाम् उल्लिखितम् अस्ति यत् शब्दपरिष्काराय वायुः इन्द्रस्य सहायकः आसीत्। शब्दशास्त्रविशारदः अयं वायुः धातुव्याख्याने अपि सुतरां सिद्धः आसीत् । अस्य कालः वि० पूर्वः 9500 अस्ति । यदि वायुः देवतात्वेन स्वीक्रियते तदा अनादित्वात् कालगणना मास्तु ।

- **भागुरिः**

आचार्यो भागुरिः गद्यरूपेण पद्यरूपेण च व्याकरणस्य व्याख्यानं कृतवान् । धातुव्याख्यानात्मकं पद्यमिदं द्रष्टव्यम् ।

गुपूधूपविच्छिपणिपनेरायः कमेस्तु णिङ् ।
ऋतेरियङ् चतुर्लेषु नित्यं स्वार्थे परत्र वा ॥ **इति भागुरिस्मृतेः।**

गुपो बधेश्च निन्दायां क्षमायां च तथा तिजः ।
प्रतीकाराद्यर्थकाच्च कितः स्वार्थे सनो विधिः ॥ इति भागुरिस्मृतेः।

उक्तसूत्रेषु अनेके धातवः उल्लिखिताः सन्ति । गुपू-धातौ उकारानुबन्धोऽपि स्पष्टतया निर्दिष्टोऽस्ति । अतः आचार्यभागुरिः धातुपाठप्रवचनम् अपि कृतवान् अस्ति इति नास्ति कोऽपि शङ्कापङ्कावसरः । अस्य कालविषये यद्यपि विद्वत्सु नास्ति मतैक्यं तथा वि० पूर्वं 4000 नैके विद्वान्सः स्वीकुर्वन्ति।

- **काशकृत्स्नः (३१०० वि0 पूर्वः)**

आचार्यकाशकृत्स्नद्वारा प्रोक्तेषु शब्दानुशासनसूत्रेषु प्रथमं सूत्रमस्ति-

धातुः साधने दिशि पुरुषे चिति तदाख्यातम् ।

एतेन सूत्रेण काशकृत्स्नकृतधातुपाठः सिद्ध्यति । आचार्यस्य पाणिनेः पूर्ववर्त्तिनः अस्य आचार्यस्य सम्पूर्णोऽपि धातुपाठः उपलब्धः अस्ति । डक्खन-कालेज-पूना इत्यस्य सत्प्रयासेन कन्नडलिप्यां प्रकाशितः अयं दुर्लभग्रन्थः मिलति । काशकृत्स्नेन व्याकरणस्य 137 सूत्राणि लिखितानि सन्ति । ''काशकृत्स्नधातुपाठस्य मुख्ये पृष्ठे ''काशकृत्स्नशब्दकलाप-धातुपाठः'' इति लिखितमस्ति । सम्भवतः ''शब्दकलाप'' इति नामकरणस्य पृष्ठे तद्व्युत्पत्तिः

एव कारणमस्ति । शब्दानां कलां धात्वंशं पाति रक्षति इति । काशकृत्स्नधातुपाठे नव गणाः सन्ति । जुहोत्यादिः अदाद्यन्तर्भूतः अस्ति। धातुपाठेऽस्मिन् प्रथमं परस्मैपदधातवः वर्णिताः सन्ति तदनन्तरम् आत्मनेपदिनः । क्वचित् पाणिनिधातुपाठे काशकृत्स्नधातुपाठे च साम्यमपि दृश्यते । यथा– पाणिनिधातुपाठे ''ईड'' स्तुतौ धातुः वर्तते। काशकृत्स्नव्याकरणे ईड ईल धातु स्तुत्यर्थे वर्तते । गवेषणायाः कृते हिन्द्यां 'ढूंढना' इति शब्दः प्रयुक्तोऽस्ति । काशकृत्स्नेन गवेषणायाः कृते ढुढि प्रयोगः कृतः अस्ति । अस्य धातोः निर्देशः स्कन्दपुराणस्य काशीखण्डे विहितोऽस्ति ।

अन्वेषणे ढुण्ढिरयं प्रथितोऽस्ति धातुः ।
सर्वार्थढुण्ढिततया तव ढुण्ढिनाम ॥

काशकृत्स्नधातुपाठस्य या टीका कन्नडभाषायां समुपलब्धा भवति तस्य कर्ता चन्नवीरकविः अस्ति । अस्य ग्रन्थस्य प्रतिगणानन्तरं टीकाकारः चन्नवीरकविः स्वपरिचयं ददाति ।

इति श्रीयागाष्टिशरभलिङ्गप्रसादिनस्तित्तिरयजुः शाखाध्ययनस्य वामदेवमुखोद्धतस्य गजकर्णपुत्रस्य अत्रिगोत्रस्य वीरमाहेश्वरतन्त्रसूत्रस्य शिवलंकमचनपण्डिताराध्यप्रवरस्य कोकिला–कुण्डस्य संगनगुरुलिङ्गनंद्यम्बाकुमारस्य पितृव्यनम्ब्यणगुरुकरजातस्य सह्याद्रीकटकषड्देशस्य कुण्टिकापुरस्य काशीकाण्डचण्डवीरकविकृतौ काशकृत्स्नधातुकर्नाटटीकायाम् आत्मानेपदिनः लेखकपाठकश्रोतृणां संस्कृतार्थप्रकाशिका भूयात् । श्री नरसिंहाचार्यमतानुसारं चन्नवीरकवेः कालः 1500 ई० अस्ति ।

♦ शाकटायनः (३००० वि0 पूर्व)

सर्वेऽपि नामशब्दाः धातुजाः एवेति स्वीकरोति आचार्यः शकटायनः । यास्कः निरुक्ते लिखति यत्–

''तत्र नामान्याख्यातजानीति शकटायनो नैरुक्तसमयश्च'' ।

महाभाष्यकारः भगवान् पतञ्जलिः अपि लिखति यत्–

व्याकरणे शकटस्य च तोकम्– वैयाकरणानां च शाकटायन आह–धातुजं नामेति। पाणिनि–धातुपाठापेक्षया शाकटायनस्य धातुपाठः विस्तृतः अस्ति। यद्यपि शाकटायनप्रोक्तस्य धातुपाठस्य साक्षात् रूपेण प्राचीनपुस्तकेषु नैवोपलब्धिः। अथापि तेन सर्वाणि नामानि धातुजाति स्वीकृतानि। अत शाकटायनप्रोक्तधातुपाठोऽपि निश्चयेन स्यादिति सम्भावना । शाकटायनस्य समयः वि० पूर्वः 3000 वर्षः अस्ति ।

♦ अपिशलिः (३००० वि0 पूर्वम्)

वैयाकरणस्य आपिशलेः जन्मसमयः वि० पूर्वः 3000 वर्षः अस्ति । यद्यपि अस्य वैयाकरणस्य धातुपाठः सम्प्रति उपलब्धः नास्ति, तथापि तद्धातुपाठः अनेकैः उद्धरणैः उपलभ्यते । यथा महाभाष्यकारः लिखति यत्– अस्ति सकारमातिष्ठते । आगमौ गुणवृद्धी आतिष्ठेते । महाभाष्यम् 1–3–22। इदम् उदाहरणं काशिकायाम् अपि उपलब्धम् अस्ति । अस्य विषये न्यासकारः जिनेन्द्रबुद्धिः लिखति यत्–

सकारमात्रमस्ति धातुमापिशलिराचार्यः प्रतिजानीते । तथापि न तस्य पाणिनेरिव ''अस् भुवि'' गणपाठः । किं तर्हि ''स भुवि'' इति स पठति । आगमौ गुणवृद्धी आतिष्ठेत इति । स त्वागमौ गुणवृद्धी आतिष्ठेते । एवं हि स प्रतिजानीते इत्यर्थः ।

काशिकाया: उक्तपाठं हरदत्त: विवृणोति यत्– स्त: सन्ति इत्यादौ सकारमात्रस्य दर्शनात् ''स भुवि'' इत्येव धातु: पाठ्य: । अस्तीत्यादौ पिति सार्वधातुके अडागमो विद्येय:। आस्तामासन्नित्यादौ आडागम: स्याद् इत्यापिशला: मन्यन्ते ।

इदानीम् अर्वाचीनवैयाकरणानां चर्चां करोमि येषां धातु–पाठ: सम्प्रति अपि उपलब्धोऽस्ति अथवा परिज्ञातोऽस्ति ।

♦ कातन्त्रधातुपाठ: (१५०० वि० पूर्व)

कातन्त्रव्याकरणस्य स्वकीय: एक: स्वतन्त्र: धातुपाठ: अस्ति । अतिविरला: सन्ति कातन्त्रधातुपाठस्य हस्तलेखा: । इदानीं कातन्त्रधातुपाठस्य द्वौ हस्तलेखौ उपलब्धौ स्त:। तदनुसारम् इत्थं भाति यत् कातन्त्रधातुपाठ: काशकृत्स्न–धातुपाठस्य संक्षिप्तरूपं भवति। कातन्त्र–धातुपाठस्य एक: हस्तलेख: सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य सरस्वतीभवनपुस्तकालये वर्तते ।

♦ चान्द्रधातुपाठ: (१००० वि० पूर्व)

आचार्यचन्द्रगोमि: स्वीयतन्त्राय धातुपाठस्य प्रवचनं कृतवान् । ब्रुनो लिबिश: चान्द्रव्याकरणेन सह एनं धातुपाठमपि प्रकाशितवान् । काशकृत्स्न– धातुपाठस्य या प्रवचन–शैली अस्ति तस्या: प्रभाव: चान्द्रधातुपाठोपरि वर्तते । आचार्यस्य चन्द्रगोमिमहोदयस्य जन्मसमय: वि० पूर्व: 1000 अस्ति ।

एवमेव क्षपणकादि (वि० सं० प्रथमशती) धातुपाठकाराणां उल्लेख: क्रियते। विस्तारभयात् नामान्येव जानातु ।

1. कातन्त्रकार:	1500 वि० पूर्व:।
2. चन्द्रगोमि:	1000 वि० पूर्व:।
3. क्षपणक:	वि० सं० प्रथमशतकपूर्व:।
4. देवनन्दी	वि० सं० 500–550 पूर्व:।
5. वामन:	वि० सं० 400 अथवा 600 पूर्व:।
6. पाल्यकीर्ति:	वि० सं० 871–924 पूर्व:।
7. शिवस्वामी	वि० सं० 914– 940 पूर्व:।
8. भोजदेव:	वि० सं० 1075–1110 पूर्व:।
9. बुद्धिसागर:	वि० सं० 1080 पूर्व:।
10. भद्रेश्वरसूरि: सं०	वि० सं० 1200 पूर्व:।
11. वर्धमान:	
12. हेमचन्द्र:	वि० सं० 1145–1229 पूर्व:।
13. मलयगिरि:	वि० सं० 1188–1250 पूर्व:।
14. क्रमदीश्वर:	वि० सं० 1250 पूर्व:।
15. सारस्वतकार:	वि० सं० 1250 पूर्व:।

16. वोपदेवः विं सं० 1325–1370 पूर्वः।

17. पद्मनाभः वि० सं० 1400 पूर्वः।

18. विनयसगारः सं० 1660–1700 पूर्वः।

एवञ्च ये ये विद्वांसः स्वस्वशब्दानुनासनं कृतवन्तः तैः तैः स्वस्वव्याकरणानुगुणा धातुपाठाः अपि रचिताः, दुर्भाग्यात् केषाञ्चित् धातुपाठाः मिलन्ति, केषाञ्चन च नैव मिलन्ति इति ।

१३.३.३ गणपाठः तद्व्याख्यातारश्च

''गण'' संख्याने इत्यस्मात् धातोः गणशब्दस्य निष्पत्तिः भवति । अस्य शब्दस्य अर्थः अस्ति समूहः । यस्य समूहस्य कोऽपि पौर्वापर्यक्रमः सुनिश्चितो भवति स गणः भवति । यस्मिन् ग्रन्थे विशेषक्रमेण शब्दसमूहः पठितः भवति, सः पठितशब्दसमूहः गणपाठः भवति । अत्र तावत् इयं शङ्का यत् एतादृशार्थस्वीकारे धातुपाठः अपि गणपाठः भवितुम् अर्हति । परन्तु वैयाकरणवाङ्मये गणपाठशब्देन ते एव ग्रन्थाः स्वीक्रियन्ते यत्र केवलं प्रातिपदिकशब्दसमूहः सङ्कलितो भवति । इयं गणपाठशैली किमर्थम् आरब्धा। यदि एतादृशी शङ्का जायते तर्हि तत्समाधानमेवम् अस्ति– शास्त्रस्य संक्षेपीकरणाय इयं शैली प्रारब्धा । यद्यपि पञ्चाङ्गं व्याकरणं तत्र च सूत्रपाठः, धातुपाठः गणपाठः उणादिपाठः, लिङ्गानुशासनपाठश्च अङ्गानि भवन्ति। तत्र यदा जनेषु बुद्धिह्रासोवलोकितः तदा, महर्षिभिः, नामशब्दान् पृथक्कृत्य समूहः निर्मितः, ते च प्रातिपदिकगणाः तत्तत्सूत्रानुरूपाः निर्मिताः, तेन च योगरूढोऽयं गणपाठशब्दः स्वीक्रियते। धातुपाठोऽपि गणपाठः भवति। यथा भ्वादिगणः, अदादिगणः इत्येवं प्रकारेण, किन्तु केवलं गणपाठः इत्युक्ते प्रातिपदिकगणपाठः एव गृह्यत इति गृहाण । अस्याः गणपाठशैल्याः प्रयोगं पाणिनेः पूर्ववर्त्तिनः अपि आचार्याः कृतवन्तः सन्ति । ते आचार्याः इमे सन्ति–

♦ भागुरि : (४००० वि0 पूर्वः)

भागुरि– व्याकरणे आचार्यः भागुरिः गणपाठं कृतवान् अस्ति । इत्यस्य प्रमाणम् इदं पद्यम्–

मुण्डादेस्तत्करोत्यर्थे, गृह्णात्यर्थे कृतादितः ।
वक्तीत्यर्थे च सत्यादेरङ्गादेस्तन्निरस्यति ॥

तूस्ताद्विघाते संछादेर्वस्त्रात् पुच्छादितस्तथा ।
सेनातश्चाभियाने णिः श्लोकादेरप्युपस्तुतौ ॥

अत्र मुण्डादि–कृतादि–सत्यादि–पुच्छादि–श्लोकादि–पञ्च गणाः निर्दिष्टाः सन्ति। एतेन सिद्ध्यति यत् आचार्यः भागुरिः गणपाठं कृतवान् अस्ति । भाषावृत्तिकारः पुरुषोत्तदेवः लिखति यत्– ''नप्तेति भागुरिः'' अर्थात् भागुरिमते नप्तृशब्दः स्वस्रादिगणे पठितः आसीत्। अस्य आचार्यस्य कालः वि० पूर्वः 4000 वर्षः अस्ति।

♦ शन्तनुः (सं. ३००० वि0 पूर्व)

आचार्यशन्तनुकृतशब्दानुशासने फिट्सूत्रेषु गणस्य उल्लेखः मिलति । यथा– घृतादि–ग्रामादिः। इमे नियतपठितगणाः न सन्ति। अपितु आकृतिगणाः सन्ति । इत्थं विचिन्तयन्ति आधुनिकाः व्याख्यातारः । यदि आधुनिकव्याख्याकाराणां मतं स्वीकुर्मः तदा इदं सिद्ध्यति यत् शन्तनोः शब्दानुशासने गणपाठस्य परम्परा आसीत्।

♦ काशकृत्स्नः (सं० ३००० वि० पूर्वः)

काशकृत्नः धातुपाठस्य प्रवचनं कृतवान् अस्ति इति पूर्वं व्याख्यातम् अस्ति। ये वैयाकरणाः धातुपाठस्य पृथक् प्रवचनं कृतवन्तः सन्ति ते गणपाठस्यापि अश्वयमेव प्रवचनं करिष्यन्ति इत्यत्र नास्ति कापि शङ्का । काशकृत्स्नः एकं सूत्रं लिखति यत्–

''क्षिप्नादीनां न नोणाः''

अस्य सूत्रस्य पाणिनेः ''क्षुभ्नादिषु च'' इति सूत्रेण सह तोलनेन स्पष्टरूपेण सिद्ध्यति यत् काशकृत्स्नः क्षिप्नादिगणं मनुते । क्षिप्नाप्रभृतिशब्देषु नस्य स्थाने णत्वं न भवति इति सूत्रार्थः अस्ति अस्य । यथा– क्षिप्नाति ।

♦ आपिशलिः (सं० २९०० वि० पूर्वः)

पाणिनिद्वारा स्मृताचार्येषु आपिशलिः अन्यतमोऽस्ति। पाणिनेः आपिशलेश्च संज्ञासूत्रेषु प्रत्याहारेषु साम्यं दृश्यते । अयम् आचार्यः गणपाठस्यापि प्रवचनं कृतवान् अस्ति इति आचार्यभर्तृहरिवचनप्रमाणम् । यथा–

इह त्यदादीन्यापिशलैः किमादीन्यस्मत्पर्यन्तानि, ततः पूर्वापराधरेति । अर्थात् आपिशलेः गणपाठे त्यदादिगणः किमः आरभ्य अस्मत् पर्यन्तम् आसीत्। तत्पश्चात् पूर्वापराधरादि–गणसूत्राणि पठितानि आसन् । एतद्भर्तृहरिवचनं प्रदीपकारः कैयटः निम्नवचनैः समर्थयति त्यदादीनीति पठित्वा गणे कैश्चित् पूर्वादीनि पठितानि । तदेवमापिशलेः गणपाठ आसीदिति गम्यते ।

♦ पाणिनिः (सं० २९०० वि० पूर्वः)

आचार्यपाणिनिकृतः गणपाठः इदानीं समुपलब्धोऽस्ति इति परमसौभाग्यस्य विषयः। पाणिनीयवैयाकरणाः यं गणपाठं स्वीकुर्वन्ति तस्य पाणिनीयत्वापाणिनीयत्वे प्राचीन–ग्रन्थकारेषु मतभिन्नता दृश्यते काशिकाव्याख्याकारः जिनेन्द्रबुद्धिः बहुषु स्थलेषु लिखति यत् गणपाठः अपाणिनीयोऽस्ति। यथा–

अथ गण एव कौशिकग्रहणं कस्मान्न कृतम्? कः पुनरेवं सति गुणो भवति? सूत्रे पुनर्बभ्रूग्रहणं न कर्तव्यं भवति। सत्यमेतत् अपाणिनीयत्वाद् गणस्य नैवं चाकरणे पाणिनिरूपालम्भमर्हति इति ।

किन्तु न्यासकारं परित्यज्य प्रायः अन्ये सर्वे पाणिनीयवैयाकरणाः गणपाठस्य पाणिनीयत्वमेव स्वीकुर्वन्ति । अस्य पाणिनीयत्वे प्रमाणम् इदम्–

यः वैयाकरणः गणशैलीं स्वीकरोति सः तां विना शब्दानुशासनस्य प्रवचनं न कर्तुं शक्नोति । अतः शब्दानुशासनाय पाणिनिरपि तथैव करिष्यति । यतो हि प्रवचनात्पूर्वं तत्तद्गणस्य आवश्यकता भवति । भगवान् भाष्यकारोऽपि महाभाष्ये सूत्रपठितशब्दविशेषैः विभिन्नानि ज्ञापनानि ज्ञापयति । ज्ञापनस्य कृते च प्रयुङ्क्ते– ज्ञापयति आचार्यः । एवमेव गणपाठे पठितैः अनेकशब्दविशेषैः अर्थविशेषान् ज्ञापयन् आचार्यपदं योजयति । यथा– यदयं युक्तारोह्यादिषु पादच्छब्दं पठति तज्ज्ञापयत्याचार्यो निमित्तस्वरान्निमित्तस्वरो वलीयानिति । (महाभाष्य 2-1-1)

यदयं कस्कादिषु भ्रातुष्पुत्रशब्दं पठति तज्ज्ञापयत्याचार्यो नैकादेशनिमित्तात् षत्वं भवतीति । (महाभाष्य 8-3-11)

एवं तर्हि आचार्यप्रवृत्तिर्ज्ञापयति न तद्विशेषेभ्यो भवति यदयं विपाट्शब्दं शरत्प्रभृतिषु पठति । (महा० 1-1-22)

उक्तोदाहरणैः स्पष्टमेव यत् महाभाष्यकारः पतञ्जलिः सूत्रपाठमिव गणपाठमपि आचार्य-पाणिनेः कृतिं स्वीकरोति ।

तत्र केचन आकृतिगणाः भवन्ति, केचन च आकृतिगणाः न भवन्ति । येषु गणेषु कांश्चन शब्दान् पठित्वा अन्येऽपि तादृशाः शब्दाः विवक्षिताः भवन्ति । ते आकृतिगणाः यथा शकन्ध्वाद्याकृतिगणः, अतः तत्र अपठितस्यापि "मार्तण्डशब्दस्य" स्वीकारः क्रियते, ये आकृतिगणाः न भवन्ति, तत्र ये पठिताः तेषामेव कार्यम् इति जानातु ।

अन्ये गणपाठकर्त्तारः

गणपाठकर्तारश्च अनेके भवन्ति, तेषां केवलं नामानि दीयन्ते । तथा-

	नामानि	कालः
1.	नामपारायणकारः	वि० सं० 700 पूर्वः।
2.	श्रीक्षीरस्वामी	वि० सं० 1115-1165 पूर्वः।
3.	गणपाठविवृत्तिः	वि० सं० 1200 पूर्वः।
4.	पुरुषोत्तमदेवः	वि० सं० 1200 पूर्वः।
5.	नारायणन्यायपञ्चाननः	
6.	यज्ञेश्वरभट्टः	
7.	कातन्त्रकारः	वि० सं० 2000 पूर्वः।
8.	चन्द्रगोमी	वि० सं० 1000 पूर्वः।
9.	क्षपणकः	वि० प्रथमशतकपूर्वः।
10.	देवनन्दी	वि० सं० 500 पूर्वः।
11.	वामनः	वि० सं० 350-600 पूर्वः।
12.	पाल्यकीर्तिः	वि० सं० 871-924 पूर्वः।
13.	महाराजः भोजदेवः	वि० सं० 1075-1110 पूर्वः।
14.	भद्रेश्वरसूरिः	वि० सं० 1200 वि० पूर्वः।
15.	हेमचन्द्रसूरिः	वि० सं० 1145-1229 पूर्वः।
16.	वर्धमानः	वि० सं० 1160-1210 पूर्वः।
17.	क्रमदीश्वरः	वि० सं० 1300 पूर्वः।
18.	सारस्वतव्याकरणकारः	वि० सं० 1300 पूर्वः।
19.	वोपदेवः	वि० सं० 1300-1350 पूर्वः।
20.	पद्मनाभदत्तः	वि० सं० 1400 पूर्वः।

21. कुमारपालः त्रयोदशशतकः

22. अरुणदत्तः सं० 1190 वि० पूर्वः।

23. पारायणिकः

24. रत्नमतिः

१३.३.४ **उणादिपाठः तद्व्याख्यातारश्च**

शाकटायनातिरिक्तं प्रायः सर्वे वैयाकरणाः सहस्राधिकशब्दानां रुढित्वं स्वीकुर्वन्ति। परन्तु यौगिकत्वरूपं प्राचीनं पक्षं रक्षयितुं तथा नैरुक्ताचार्यस्य सिद्धातं दृष्टिपथीकर्तुं धातु-प्रत्यय-निदर्शनार्थम् उणादिसूत्ररूपं कृदन्तभागं शब्दानुशासनस्य परिशिष्टं व्याकरण-निकाये स्वीकृतमस्ति । भगवान् पतञ्जलिः उणादिसूत्राणां महत्तां वर्णयति-

बाहुलकं प्रकृतेस्तनुदृष्टेः प्रायः समुच्चयनादपि तेषाम्
कार्यसशेषविधेश्च तदुक्तं नैगमरुढिभवं हि सुसाधु ।

नाम च धातुजमाह निरुक्ते व्याकरणे शकटस्य च तोकम् ।
यन्न पदार्थविशेषसमुत्थं प्रत्ययतः प्रकृतेश्च तदूह्यम् ।

संज्ञासु चातुरूपाणि प्रत्ययाश्च ततः परे ।
कार्याद्विद्यादनूबन्धम् एतच्छास्त्रमुणादिषु ॥ (उणादयो बहुलम् ३.३.१)

अर्थात् ''उणादयो बहुलम्'' इति सूत्रे ''बहुलम्'' पदनिर्देशः धातुभ्यः उणादिप्रत्ययान् बकाहुलकात् कर्तुम् अस्ति । तदेवं शाकटायनमते सर्वेऽपि प्रातिपदिकशब्दाः धातुजाः एव भवन्ति । एतदर्थं शाकटायनः स्वव्याकरणं स्वं च गणपाठं स्वीकृतवान् ।

- **उणादिपाठस्य नामान्तरम्**

प्राचीनः ग्रन्थकारैः उणादिपाठाय उणादिकोशब्दस्य उणादिगणशब्दस्य च व्यवहारः कृत अस्ति । पञ्चपाद्युणादिपाठस्य व्याख्याकारः महादेववेदान्ती, दयानन्दसरस्वत्यादयः वैयाकरणाः उणादिपाठस्य कृते उणादिकोशशब्दस्य प्रयोगं कृतवन्तः सन्ति । यथा-

क. इत्युणादिकोशे निजविनोदाभिधेये वेदान्तिमहादेवविरचिते पञ्चमः पादः सम्पूर्णः।

ख. इति श्रीमत्स्वामिदयानन्दसरस्वतीकृतोणादिव्याख्यायां वैदिकलौकिककोशे पञ्चमः पादः समाप्तः ।

- **प्राचीनानि उणादिसूत्राणि''**

अद्यत्वे यावन्ति उणादिसूत्राणि समुपलब्धानि सन्ति तेषु दशपादी उणादिसूत्रं सर्वप्राचीनम् अस्ति । पाणिनीयवैयाकरणैः पञ्चपादी उणादिसूत्राणि दशपाद्युणादिसूत्राणि च समादृतानि सन्ति । सिद्धान्तकौमुदीकारः भट्टोजिदीक्षितः पञ्चपाद्युणादिसूत्राणि स्वकीये ग्रन्थे लिखितवान् अस्ति । सम्प्रति येषां वैयाकरणानां उपलब्धानि सन्ति उणादिसूत्राणि तेषां नामोल्लेखः भवति।

- **काशकृत्स्नः**

काशकृत्स्नकृतानि उणादिसूत्राणि इदानीं नोपलभ्यन्ते ।

काशकृत्स्नकृतधातुपाठस्य टीका कन्नडभाषायां मिलति । यस्य लेखकः अस्ति चन्नवीरकविः ।

- **शन्तनुः**

डॉ कीलहार्नमहोदयेन सम्पादिता मध्यप्रदेशहस्तलेखसूची इति पुस्तकाधारेण संकेतो मिलति यत् आचार्यः शन्तनुः उणादिसूत्राणि अपि ससर्ज । परन्तु सवर्था पुष्टस्य तथ्यस्य अत्र अभावः अस्ति ।

- **आपिशलिः**

आचार्यः आपिशलिः स्वशब्दानुशासनग्रन्थे खिलपाठरूपेण उणादिसूत्राणामपि प्रवचनं कृतवान् स्यात् इति नास्ति अत्र सन्देहः । परन्तु आपिशल्युणादिसूत्रं इदानीम् अपि समुपलब्धं नास्ति ।

- **पाणिनिः**

पञ्चपाद्युणादिसूत्राणां प्रवक्ता कः? इति विषये प्राचीनग्रन्थे मतद्वयमस्ति । अनेकैः आचार्यैः उणादिपाठस्य व्याख्याता शाकटायनः स्वीक्रियते । यथा–

उणादय इत्येव सूत्रमुणादीनां शास्त्रान्तरपठितानां साधुत्वज्ञापनार्थम् अस्तु इति भावः।

पञ्चपादी वृत्तिकारः श्वेतवनवासी लिखति यत्–

येयं शाकटायननादिभिः पञ्चपादी रचिता ।

एतैः उद्धरणैः सिद्धयति यत् अनेके विद्वांसः स्वीकुर्वन्ति यत् पञ्चपाद्युणादिसूत्रप्रवक्ता शाकटायनः अस्ति । प्रक्रियासर्वस्वकारः नारायणभट्टः उणादिप्रकरणे लिखति यत्–

अकारं मुकुरस्यादौ उकारं दर्दुरस्य च ।
बभाण पाणिनिस्तौ तु व्यत्ययेनाह भोजराट् ॥

अर्थात् पाणिनिः मुकुरशब्दस्य आद्यकारं दर्दुरशब्दस्य च उकारं नीत्वा दर्दुरशब्दस्य निष्पत्तिं करोति किन्तु भोजराजः व्यत्येन दर्दुरशब्दं स्वीकरोति । एतेन सिद्धयति यत् पाणिनिः एव उणादिपाठप्रोक्तवान् अस्ति। शिशुपालबधे माघः लिखति यत्–

निपातितसुहृत्स्वामिपितृव्यभातृमातुलम् ।
पाणिनीयमिवालोचि धीरैस्तत्समराजिरम् ॥

श्लोकेऽस्मिन् सुहत्–स्वामि–पितृव्य–भातृ–मातुलशब्दाः पाणिनिना निपातिताः सन्ति इति सङ्केतितमस्ति । एतेन स्पष्टमस्ति यत् माघः उणादिपाठस्य प्रवक्तारं पाणिनिं स्वीकरोति। यथा गणपाठकर्तारः धातुपाठकर्तारः वा अनेके आचार्याः भवन्ति, तद्वत् उणादिसूत्रकाराः अपि अनेके संजाताः । तथा हि

अन्ये उणादिसूत्रप्रवक्तारः

नामानि	**कालः**
1. गोवधर्नः	सं० 1200 वि० पूर्वम्।

2. दामोदरः	सं० 1200 वि० पूर्वम्।
3. पुरुषोत्तमदेवः	सं० 1200 वि० पूर्वम्।
4. सूतीवृत्तिकारः	सं० 1200 वि० पूर्वम्।
5. उज्ज्वलदत्तः	सं० 1300 वि० पूर्वम्।
6. विद्याशीलः	सं० 1250 वि०
7. श्वेतवनवासी	सं० 1300 शतके
8. भट्टोजिदीक्षितः	सं० 1570–1650
9. नारायणभट्टः	सं० 1617–1733
10. महादेववेदान्ती	सं० 1720–1770
11. रामभद्रदीक्षितः	सं० 1710–1760
12. वेङ्कटेश्वरः	वि० सं० 1760
13. पेरुसूरिः	वि० सं० 1760–1800
14. शिवरामः	वि० सं० 1850
15. रामशर्मा	वि० सं० 1940
16. स्वामीदयानन्दसरस्वतीवि०	सं० 1939
17. कात्यायनः	वि० सं० 2000 पूर्वम्
18. चन्द्राचार्यः	वि० सं० 1000 पूर्वम्
19. क्षपणकः	वि० प्रथमशतकम्
20. देवनन्दीः	वि० सं० 500 पूर्वम्
21. वामनः	वि० सं० 350–600 पूर्वम्
22. पाल्यकीर्तिः	वि० सं० 871–924
23. भोजदेवः	वि० सं० 1075–1110
24. बुद्धिसागरसूरिः	वि० सं० 1080
25. हेमचन्द्रसूरिः	वि० सं० 1145–1229
26. क्रमदीश्वरः	वि० सं० 1300 पूर्वम्
27. सररस्वत–व्याकरणकारः	वि० सं० 1300
28. रामाश्रयः	वि०सं० 1741 पूर्वम्
29. पद्मनाभदत्तः	वि० सं० 1400

१३.३.५ **फिटसूत्राणि तद्व्याख्यातारश्च**

पाणिनीयवैयाकरणसम्प्रदाये स्वरविषयकः एकः फिट्सूत्रनाम्ना प्रसिद्धः लघुकायः ग्रन्थः अस्ति । अव्युत्पत्तिपक्षे यत्र प्रकृतिप्रत्ययविभागः अस्वीकृतो भवति तत्र फिट्सूत्राणां प्रवृत्तिर्भवति । श्वेतनवनवासी उणादिवृत्तौ लिखति यत्-

अव्युत्पत्तिपक्षे तु लघावन्ते द्वयोश्च वपुषो गुरुः
इति मध्योदात्तः । अस्य फिट्सूत्रस्य अयमर्थः ।

नागेशभट्टः लिखति यत्-

प्रकृतिप्रत्ययविभागशून्येष्वेव फिट्सूत्रप्रवृत्तेश्च।

महाभाष्यप्रदीपे1-2-45)

♦ फिट्सूत्राणां प्रवक्तारः

पाणिनीयसम्प्रदाये फिट्-सूत्र-प्रवक्तृ-विषये मतान्तरम् अस्ति । केचन शन्तनुप्रोक्तानि फिट्सूत्राणि सन्तीति मन्वते। केचन च शान्तनवाचार्यप्रोक्तानि । किन्तु रामचन्द्रः स्वरप्रक्रियायां लिखति यत्- वस्तुतस्तु फिट्सूत्राणां पाणिनीयत्वमेव पूर्वोदाहृतभाष्यस्वरसात् पूर्वकालत्वञ्च । शान्तनवाचार्यस्तु वृत्तिकारः न तु सूत्रकारः इति न कापि अनुपपत्तिः । अत्रापि अनेके आचार्याः फिट्सूत्राणां व्याख्याकारो भवन्ति ।

♦ **फिट्सूत्रव्याख्यातृनामानि**

1. विट्ठलः
2. भट्टोजिदीक्षितः (1570-1650 वि० सं)
3. श्रीनिवासयज्वा (सं० 1750 वि०)

१३.३.६ **लिङ्गानुशासनं तद्व्याख्यातारश्च**

लिङ्गानुशासनं नाम शब्दानुशासनम् । यथा प्राणिजगति पुंस्त्वस्य स्त्रीत्वस्य व्यवहारः भवति तथैव शास्त्रेऽपि पुंस्त्व-स्त्रीत्वबोधनाय लिङ्गानुशासनस्य आवश्यकता भवति। पाणिने-प्राक् लिङ्गानुशासन-प्रवक्तारौः इमौ स्तः ।

शन्तनुः (वि० सं० 3100 पूर्वः)

व्याडिः (वि० सं० 2850 पूर्वः)

हेमचन्द्राचार्यः स्वोपपज्ञलिङ्गानुशासन-विवरणे लिखति यत्-पुंसि-व्याडिः, स्त्रियां वामनः, पुन्नपुंसकोऽयमिति बुद्धिसागरः ।

♦ **पाणिनिः**

भगवान् पाणिनिः लिङ्गानुशासनं लिखितवान् अस्ति इति ब्रवीति हरदत्तः ।

अप्सुमनः समासिकतावर्षाणां बहुत्वं चेति पाणिनीये सूत्रम् । पदमञ्जरी।

वस्तुतः लिङ्गम् 'अशिष्यं लोकाश्रमत्वात् लिङ्गस्य' इति वचनेन लिङ्गानुशासने, विदुषां तथा प्रवृत्तिः नैवास्ति । एवमेव कात्यायनस्य "न वा लिङ्गाऽभावात्" इति वार्तिकव्याख्यायां पतञ्जलिना उच्यते अलिङ्गे युष्मदस्मदी इति ।

♦ **अन्ये व्याख्यातारः**

1. भट्ट उत्पलः , 2. रामचन्द्रः, 3. भट्टोजिदीक्षितः, 4. नारायणभट्टः, 5. रामानन्दः, 6. नारायणसुधी, 7. तारानाथतर्कवाचस्पतिः, 8. चन्द्रगोमी, 9. वररुचिः, 10. देवनन्दी, 11. शंकरः, 12. हर्षवर्धनः, 13. दुर्गसिंहः, 14. वामनः, 15. पाल्यकीर्तिः, 16. भोजदेवः, 17. बुद्धिसागरः, 18. हेमचन्द्रसूरिः, 19. मलयगिरिः, 20. मुग्धबोधसंवद्ध लिङ्गानुशासनम्, 21. हेलाराजः, 22. रामसूरिः इति।

१३.३.७ परिभाषापाठकर्त्तारः तद्व्याख्यातारश्च

पाणिनि-शब्दानुशासनेन पाणिन्युत्तरशब्दानुशासनेन च सम्बद्धः परिभाषापाठनामकः एकः संग्रहः मिलति । एतस्मिन् संग्रहे परिभाषाणां संख्यायां न्यूनाधिक्यं दृश्यते । क्वापि पाठभेदः क्वापि क्रमभेदोऽपि दृश्यते । परन्तु प्रायः सर्वस्मिन् अपि संग्रहे समानता अस्ति । परिभाषायाः किं लक्षणमिति विचारयामः तर्हि व्याख्याकाराः वदन्ति यत्- अनियमे नियमकारिणी परिभाषा । परितो व्यापृतां भाषां परिभाषां प्रचक्षते इत्यपि लक्षणम् । महाभाष्यकारमते परिभाषा एकः विशिष्टप्रकारकः अधिकारः अस्ति । स लिखति-

अधिकारो नाम त्रिप्रकारकः । कश्चिदेकदेशस्थः सर्वं शास्त्रम् अभिज्वलयति। यथा प्रदीपः सुप्रज्वलितः सर्वं वेश्म अभिज्वलयति । अर्थात् अधिकारः त्रिप्रकारकः भवति । तेषु कश्चित् एकदेशे स्थितः सम्पूर्णं शास्त्रं प्रकाशयति । यथा सम्यक् प्रज्वलितः दीपः सर्वं गृहं प्रकाशयति । परिभाषाणां द्वैविध्यम् अस्ति । पाणिनीयादिग्रन्थेषु सूत्ररूपेण पठिताः परिभाषाः। सूत्रान्तरैः ज्ञापिता अस्ति । पाणिनीयादिग्रन्थेषु सूत्ररूपेण पठिताः परिभाषाः यथा- ‘‘षष्ठी स्थाने योगा’’ ‘‘अचश्च’’ इत्यादयः । ज्ञापिताः यथा- व्याख्यानतो विशेषप्रतिपत्तिः न हि सन्देहालक्षणम् इत्यादयः ।

इदानीम् इदं विचारयामः यत् एतासां परिभाषाणां मूलं किमस्ति। तर्हि निश्चप्रचं वक्तुं शक्यते यत् एतासां मूलं वैयाकरणानां सूत्रपाठानां विशिष्ट-विशिष्टसूत्रम् एव अस्ति । सीरदेवः परिभाषाविषये लिखति- परिभाषा हि नाम न साक्षात् पाणिनीयवचनानि। किं तहि? नानाचार्याणाम् (परिभाषावृत्तिः पृष्ठ 186) । एतासां परिभाषाणां क्व आश्रयणं कर्तव्यं क्व च न कर्तव्यम् इति विषये पुरुषोत्तमदेवः लिखति-

तत्र पाणिनीये शब्दानुशासने यत्रैव विशिष्टविषये मुख्यलक्षणेन सिद्धिः तत्रैव एताः गत्यन्तरम् अपश्यद्भिः आश्रीयन्ते न तु यत्र एतासां समाश्रयणे दोषः एव प्रत्युपपद्यते तत्र एताः समाश्रीयन्ते ।

इदानीं परिभाषा-पाठ-काराणां विषये चर्चां कुर्मः। परिभाषा-पाठ-काराणां परिचयः संक्षेपेण-

काशकृत्स्नं (3100 वि० पूर्व)

एतेन आचार्येण धातुपाठः उणादिपाठश्च कृतः अस्ति । अतः परिभाषापाठस्यापि संभावना अस्ति ।

व्याडिः (2950 वि० पूर्व)

पाणिनिः (2900 वि० पूर्व)

हरदत्तः सं० 1115 वि०

पुरुषोत्तमदेवः- 1200 वि० सं०

सीरदेवः- 1200-1400 वि० सं०

बोधप्रश्नः

1. खिलशब्दात् कस्य ग्रहणं भवति?

....

.... ।

2. जिनेन्द्रबुद्धिः खिलशब्देन किं गृह्णाति?

....

.... ।

3. शब्दः कतिप्रकारकः भवति?

....

.... ।

4. धातुशब्दस्य कः अर्थः?

....

.... ।

5. गणपाठः कः भवति?

....

.... ।

6. उणादिपाठस्य किं प्रयोजनम्?

....

.... ।

7. नागेशभट्टः फिट्सूत्राणां विषये किं लिखति?

....

.... ।

8. लिङ्गानुशासनं नाम किम्?

.... ।

....

9. व्याडेः समयः कः?

.... ।

10. का नाम परिभाषा?

....

.... ।

१३.४ सारांशः

अस्मिन् प्रकरणे खिलशब्दार्थं विज्ञाय भवान् धातु-पाठ-कर्तृणां कालादिविषयन् ज्ञातवान् । धातुपदेन कस्य ग्रहणं भवति इत्यपि विचारं दृष्टवान् । पुनश्च गणपाठस्य का उपयोगिता भवति । संक्षेपीकरणाय गणपाठः कथम् उपयोगी भवति । उणादिमते निरुक्तकारस्य किं मतम् अस्ति । उणादि-सूत्राणां किं महत्त्वम् अस्ति । उणादिपाठस्य नामान्तरम् । के के उणादिसूत्रकाराः व्याख्यातारश्च । कियन्तः सन्ति उणादिसूत्रकाराः व्याख्याकाराश्च । फिट्-सूत्राणां किं वैशिष्ट्यम् फिट्सूत्रप्रवक्तारः के? लिंगानुशासनं किं, तस्य किं प्रयोजनम्। परिभाषायाः लक्षणं परिभाषायाः प्रकारः इत्यादयः विषयः भवता संक्षेपेण दृष्टाः।

13.5 शब्दावली

खिलपाठः – परिशिष्टपाठः, व्याकरणस्य खिलपाठाः सूत्रं विहाय धातुपाठः, गणपाठः, उणादिपाठः, लिङ्गनुशासन-पाठश्च।

फिट्सूत्राणि – 'फिष्' इति प्रातिपदिकसंज्ञा, तस्य प्रथमैकवचने फिट् इति रूपम्, शन्तनवः प्रणेता फिट्सूत्राणाम्।

परिभाषा – अनियमे नियमकारिणी परिभाषा।

13.6 बोधप्रश्नोत्तराणि

1. खिलशब्दात् धातुपाठः गणपाठः उणादिपाठः लिङ्गानुशासनं च गृह्यते ।
2. खिलपाठः धातुपाठः चकारात् प्रातिपदिकपाठश्च इति जिनेन्द्रबुद्धिः लिखति ।
3. शब्दः त्रिविधः धातुजः अधातुजः नमजश्च ।
4. शब्दानां विविधं रूपं यः धरति धारयति वा स धातुः। भूवादयो धातवः इत्यपि।
5. विशेषक्रमेण प्रातिपदिकानां पठितशब्दस्मूहः गणपाठः।
6. धातु-प्रत्यय-निदर्शनार्थम् उणादिपाठः।
7. प्रकृतिप्रत्ययविभागशून्येष्वेव फिट्सूत्रप्रवृत्तेश्च ।
8. लिङ्गानुशासनं नाम शब्दानुशासनम् । शब्दानां लिङ्गबोधकम् अनुशासनम् ।
9. वि० सं० 2850 पूर्वम् ।
10. अनियमे नियमकारिणी परिभाषा ।

13.7 सन्दर्भग्रन्थः

1. व्याकरणशास्त्रेतिहासः

13.8 सहायकग्रन्थः

1. संस्कृतव्याकरणशास्त्र का इतिहासः – पं. युधिष्ठिर मीमांसकः।
2. संस्कृतशास्त्रों का इतिहास – श्री ब्रह्मदेव उपाध्यायः।
3. संस्कृतव्याकरणशास्त्रस्येतिहासः – डा. अशोकचन्द्र गोडः।
4. संस्कृतशास्त्रेतिहासः – श्री लोकमणि दहालः।

13.9 अभ्यासप्रश्नाः

क-लघूत्तरीयप्रश्नाः

1. खिलपाठे केषां गणना?

....

....।

2. केषां धातुत्वं नोपहन्यते?

....

....।

3. आकृतिगणः इत्यनेन किं बुध्यते?

....

....।

4. फिट्सूत्राणां प्रवृत्तिः कुत्र भवति?

....

....।

5. लिङ्गानुशासनस्य का आवश्यकता अस्ति?

....

....।

ख-दीर्घोत्तरीयप्रश्नाः

1. 'खिलपाठ' इत्यस्यार्थः विचिन्त्य आवश्यकतां स्थापयतु ।
2. उणादिसूत्राणां लेखकानां नामानि विलिख्य तेषां प्रयोजनं लिखतु ।

चतुर्दशः पाठः – प्रकीर्णविषयाः

पाठसंरचना

14.1 प्रस्तावना

स्वागतमत्र भवतः व्याकरणशास्त्रेतिहासखण्डस्य अन्तिमे पाठे । इतः पूर्वं भवान् इतिहाससबद्धान् अनेकान् आचार्यान्, तत्कृतग्रन्थान् च ज्ञातवान्। अस्मिन् पाठे प्रकीर्णविषयाः भवन्ति । अत्र भवान् लक्ष्यप्रधानकाव्यकाराणाम् आचार्याणां विषये पठिष्यति । अत्रैव निरूक्तविषये, अथ च शिक्षाग्रन्थविषयेऽपि पठिष्यति, पाणिनिव्याकरणस्य। अध्ययन परम्पराविषयेऽपि ज्ञास्यति ।

१४.२ उद्देश्यम्

एनं पाठं पठित्वा भवान् –

1. लक्ष्यप्रधानकाव्यं किं किञ्च तेषां महत्त्वमिति ज्ञास्यति ।
2. शाब्दसाधुत्वकरणे निरूक्तस्य प्रयोजनं ज्ञातुं शक्ष्यति ।
3. शिक्षाग्रन्थविषयं ऐतिहासिकं तथ्यं ज्ञातुं प्रभविष्यति ।
4. पाणिनिव्याकरणस्याध्ययनपरम्परा विषये च ज्ञास्यति ।

१४.३ इतिहाससम्बन्धिनः प्रकीर्णविषयाः

अस्मिन् पाठे भवान् इतिहाससम्बन्धिनः ये प्रकीर्णविषयाः भवन्ति तेषां विषये पठिष्यति । प्रकीर्णविषयाः अर्थात् यत्र तत्र कीर्णाः प्रसृताः विषयाः । येषां विषयाणां गणना अधुना यावत् नाभवत्, किञ्च ते ज्ञातव्याः भवन्ति इति। शब्दानुशासनकाराणां

तत्सम्बद्धवृत्तिकारादीनां खिलपाठकाराणां वा विषये अधुना यावत् अधीतवान्। तत्र ये व्याकरणालक्ष्यप्रदर्शककाव्यग्रन्थकाराः भवन्ति, ये वा वैदिकशब्दमात्रसाधकाः वैयाकरणाः भवन्ति, तेषां विषये इदानीं यावत् न पठितवान् अस्ति। इदानीं तेषां विषये अस्मिन् पाठे पठिष्यन्ति।

१४.३.१ लक्ष्यप्रधानकाव्यप्रणेतारः

वर्तते शास्त्रीयपदार्थानां निर्वचनस्य परम्परा अतिप्राचीना । इयं परम्परा रामायणकालात् महाभारतकालात् च चलन्ती अद्यावधि सर्वान् विदुषः आकर्षयति । व्याख्यानपरम्परया अतिकठिनविषयाः अपि सहजतया बुद्धौ प्रविशन्ति प्रकाशिताश्च भवन्ति । अत एव परिभाषेन्दुशेखरे प्रोक्तम् अस्ति यत्- **व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्।** अर्थात् विशेषप्रतिपत्तिः- विशेषज्ञानं व्याख्यानतः भवति । सन्देहे जाते सति लक्षणम् अलक्षणं न भवति । तत्र व्याख्याद्वारा लक्षणस्य संघटनं करणीयम् ।

अस्याः शास्त्रीयपदार्थव्याख्यानपरम्परायाः वर्तते प्रकारद्वयम् । गद्यपरम्परा, पद्यपरम्परा च । इयं परम्पराद्वयी अपि साहित्ये प्रचुरतया समुपलब्धा भवति । किन्तु व्याकरणे पद्यपरम्परा अत्यल्पमेव दृश्यते । अत एव ''नीरसं व्याकरणम्'' इति जनश्रुतिः अपि काचित् वर्तते । इमां व्याकरणाध्ययनपरम्परां सरलीकर्तुं सरसीकर्तुं च अनेकैः विद्वद्भिः व्याकरणात्मक-काव्य-रचना कृता । एतन्माध्यमेन व्याकरणस्य अतिकठिननियमाः सरलाः तत्त्वावबोधने च सरसाः जाताः । अत एव आचार्येण क्षेमेन्द्रेण सुवृत्ततिलके प्रोक्तं यत्- काव्यमाध्यमेन यत् व्याकरण-शिक्षणपरकं शास्त्रमस्ति तदेव काव्यशास्त्रमिति । यथा-

शास्त्रं, काव्यं, काव्यशास्त्रं, शास्त्रकाव्यं प्रभेदतः ।
चतुष्प्रकारकः प्रसरः सतां सारस्वतो मतः ॥

शास्त्रकाव्यविदः प्राहुः सर्वकाव्याङ्गलक्षणम् ।
काव्यं विशिष्टशब्दार्थसाहित्यसदलंकृतिः ॥

शास्त्रकाव्यं चतुर्वर्गप्रायं सर्वोपदेशकृतः ।
भट्टिभौमककाव्यादि काव्यशास्त्रं प्रचक्षते ॥

अर्थात्- सारस्वतप्रसाराय शास्त्रम्, काव्यम्, शास्त्रकाव्यम् काव्यशास्त्रमिति काव्यस्य चत्वारः भेदाः, सन्ति । सर्वेषां काव्यानां काव्याङ्गानां च लक्षणबोधकं शास्त्रं भवति । यथा साहित्यदर्पणम्, काव्यप्रकाशः । विशिष्ट-पदार्थ-युक्तः उत्तमः अलङ्कृतः ग्रन्थः काव्यम् इत्युच्यते । यथा- रघुवंशम्, किरातार्जुनीयम्, चतुर्वर्गोपदेशकं शास्त्रमिति उच्यते । यथा- रामायणम्, महाभारतम् भट्टिभौदिकाव्यं काव्यशास्त्रम् इति उच्यते । यथा- भट्टिकाव्यम् अस्य ग्रन्थस्य अपरं नाम अस्ति रावणवधमहाकाव्यम्। रावणार्जुनीयम् इत्यादि ।

अतः स्पष्टमस्ति यत् येन काव्यग्रन्थेन यः विषयविशेषः वर्ण्यते सः काव्यशास्त्रमिति उच्यते । साहित्य-ग्रन्थेषु अनेके एतादृशाः ग्रन्थाः सन्ति यन्माध्यमेन व्याकरशास्त्रावबोधने सारल्यं भवति। अतः व्याकरणतत्त्वावबोधकं काव्यं काव्यशास्त्रम् इति रुढ़िः वर्तते । किंतु अस्मिन् अध्याये काव्यशास्त्रस्य स्थाने लक्ष्य-प्रधान-काव्य-शब्दस्य प्रयोगः करिष्यते।

- **लक्ष्यप्रधानकाव्यानां प्रयोजनम्**

व्याकरणशब्दार्थविचारं कुर्वन् भगवान् कात्यायनः ब्रबीति यत् ''लक्ष्यलक्षणे व्याकरणम्''। भगवान् भाष्यकारः पतञ्जलिः कथयति यत्- लक्ष्यं लक्षणं चैतत् समुदितं

व्याकरणं भवति । किं पुनर्लक्ष्यम्, किं वा लक्षणम्? शब्दो लक्ष्यः, सूत्रं लक्षणमिति । अस्य कथनस्य तात्पर्यम् इदम् अस्ति यत् लक्ष्यलक्षणसम्मेलनेन एव व्याकरणं भवति । किन्तु व्याकरणशब्देन लक्ष्यस्य लक्षणस्य च उभयोः ज्ञानं भवति । व्युत्पत्तीनां भिन्नत्वात् । वि+आङ्उपसर्गपूर्वकात् कृधातोः यदा ''करणाधिकरणयोश्च'' इति सूत्रेण करणार्थे ल्युट्-प्रत्ययो भवति। तदा व्याकरणशब्दस्य व्युत्पत्तिः एवं भवति- व्याक्रियन्ते (व्युत्पाद्यन्ते) शब्दाः अनेन इति व्याकरणम् । अनया व्युत्पत्त्या व्याकरण-शब्दस्य अर्थो भवति लक्षणम् । अर्थात् सूत्रम्। किन्तु कर्मणि ल्युट् प्रत्यये कृते सति व्याकरणशब्दस्य व्युत्पत्तिः एवं भवति-व्याक्रियते यत् तत् व्याकरणम् । अनया व्युत्पत्त्या ''व्याकरणशब्दार्थो भवति लक्ष्यम्। अर्थात् शब्दः ।

एतेन विवेचनेन सिद्ध्यति यत् व्याकरणस्य क्षेत्रं लक्ष्यात् आरभ्य लक्षणपर्यन्तं वर्तते। यद्यपि लक्षणमात्रस्य कृते व्याकरणशब्दस्य प्रयोगः प्रोक्तरूपर्थविशेषस्य कृते अस्ति । यथा नवाह्निके महाभाष्ये लिखितमस्ति-

प्रोक्तादयश्च तद्धिताः नोपपद्यन्ते- पाणिनिना प्रोक्तं पाणिनीयम्, आपिशलम्, काशकृत्स्नमिति। नहि पाणिनिना शब्दाः प्रोक्ताः, किन्तर्हि? सूत्रम् ।

व्याकरणशास्त्रप्रवक्तारः यत्र लक्षणग्रन्थानां प्रवचनं कृतवन्तः तत्रैव तल्लक्षणानां चरितार्थतां दर्शयितुं लक्ष्यभूतशब्दविशेषाणां संग्रहणं कृत्वा काव्यग्रन्थान् अपि रचितवन्तः इमे ग्रन्थाः एव लक्ष्यप्रधानग्रन्थाः । तथा च एतेषां लक्ष्यप्रधानग्रन्थानां प्रमुखं प्रयोजनं व्याकरणशिक्षणम् एव अस्ति ।

♦ लक्ष्यप्रधानकाव्यारम्भः

लक्ष्यप्रधानकाव्यारम्भः कदा अभवत् यद्यपि अस्मिन् विषये इतिहासः मूकः अस्ति, तथापि महाभाष्यकारः भगवान् पतञ्जलिः लक्ष्य-प्रधान-काव्यस्य एकं सुन्दरम् उदाहरणं प्रस्तुतवान् अस्ति । तथाहि-

स्तोष्याम्यहं पादिकमौदवाहिं ततः श्वभूते शातनीं पातनीं च
नेतारावागच्छतां धारणिं रावणिं च ततः पश्चात् स्रंस्यते ध्वंस्यते च ॥

अत्र पादिक-औदवाहिक-शातनी-पातनी-धारणि-रावणीति नामानि तथा च स्रंस्यते ध्वंस्यते इत्यादीनि क्रियापदानि अपि वर्णितानि सन्ति । एतेन उद्धरणेन सिद्ध्यति यत्, लक्ष्य-प्रधान-काव्यानां रचना महाभाष्यात् पूर्वम् एव प्रारब्धा आसीत् । लक्ष्यप्रधानवैयाकरणेषु एतादृशाः अपि वैयाकरणाः सन्ति ये लक्षणग्रन्थानां प्रणयनं न कृतवन्तः, किंतु पूर्वप्रसिद्ध-लक्षण-ग्रन्थान् अधिकृत्य लक्ष्यग्रन्थान् लिखितवन्तः । अत्र उभयप्रकारकवैयाकरणद्वारा रचतिकाव्यग्रन्थानां विवेचनं करिष्यिते।

♦ पाणिनिः

प्राचीन वैयाकरणेषु पाणिनिः एव एतादृशः वैयाकरणः अस्ति यस्य काव्यं न केवलं वैयाकरणनिकाये अपितु आबालवृद्धं प्रसिद्धं काव्यवाङ्मयेतिहासे मूर्धाभिषिक्तम् अस्ति । पाणिनेः काव्यस्य नाम जाम्बवतीविजयमस्ति । अस्य काव्यस्यापरं नाम पातालविजयम् अस्ति। काव्ये अस्मिन् श्रीकृष्णस्य भगवतः पातालगमनं तथा जाम्बवत्या सह तस्य परिणयकथा वर्णिता अस्ति । यद्यपि ''जाम्बवतीविजयम्'' महाकाव्यं पाणिनेः एव अस्ति इत्यत्र इतिहासकारेषु मत-मतान्तरं दृश्यते । तथापि राजशेखरानुसारं एतद्काव्यं पाणिनेः एवास्ति । यथा-

नमः पाणिनये तस्मै यस्मादाविरभूदिह।
आदौ व्याकरणं काव्यमनुजाम्बवतीजयम्॥

♦ **व्याडिः**

अयं महामुनिः व्याकरणशास्त्रस्य संग्रहकाररूपेण विख्यातः अस्ति, परं अनेकप्रमाणैः अयं व्याकरणात्मककाव्यप्रणेता अस्ति इति विदुषां मतम् । समुद्रगुप्तस्य श्रीकृष्णचरितकाव्यानुसारं व्याडिः ''बालरामचरितम्'' इति काव्यस्य प्रणेता अस्ति । यथा–

रसाचार्यः कविर्व्याडिः शब्दब्रह्मैकवाङ्मुनिः ।
दाक्षीपुत्रवचोव्याख्यापटुर्मीमांसकाग्रणीः ॥

बलचरितं कृत्वा यो जिगाय भारतं व्यासं च ।
महाकाव्यविनिर्माणे तन्मार्गस्थ प्रदीपमिव ॥

♦ **वररुचिः कात्यायनः**

महाभाष्यकारः भगवान् पतञ्जलिः उक्तवान् लक्ष्यप्रधानं काव्यशास्त्रम् अग्रेसारयन् स्वर्गारोहणं नाम महाकाव्यं लिखितवान् । आचार्यस्य वररुचेः अनेके श्लोकाः 'शर्ङ्गधरपद्धतौः 'सदुक्तिकर्णामृते', 'सुभाषितरत्नावल्यां' च प्राप्यन्ते । समुद्रगुप्तः स्वकीये ''कृष्णचरितकाव्ये'' मुनिवर्णन–प्रसङ्गे आचार्यं वररुचिम् एवं वर्णयति–

यः स्वर्गारोहणं कृत्वा स्वर्गमानीतवान् भुवि ।
काव्येन रुचिरेणासौ ख्यातो वररुचिः कविः ॥

न केवलं व्याकरणं पुपोष दाक्षीसुतस्येरितवार्तिकैर्यः ।
काव्येऽपि भूयोऽनुचकार तं वै कात्यायनोऽसौ कविकर्मदक्षः ॥

अर्थात् यः स्वर्गं गत्वा तं स्वर्गं भुवि आनीतवान् सः महाकविः वररुचिः स्वीय–मनोहर–काव्येन भुवनविदितः अस्ति । सः वररुचिः कविः न केवलं स्वकीय–वार्तिकैः पाणिनीयं व्याकरणं पोषितवान्, अपितु काव्यरचनायाम् अपि पाणिनिम् अनुकृतवान् । अयं भगवान् कात्यायनः न केवलं व्याकरणं लक्ष्यप्रधानकाव्यशास्त्रं पुपोष अपितु साहित्यविषयकं लक्षणग्रन्थमपि लिखितवान् । भरतनाट्यशास्त्रे अभिनवगुप्तः टीकायां लिखति यत्– यथोक्तं कात्यायनेन–

वीरस्य भुजदण्डानां वर्णने स्रग्धरा भवेत् ।
नायिकावर्णनं कार्यं वसन्ततिलकादिकम् ।
शार्दूलललीलाप्राच्येषु मन्दाक्रान्ता च दक्षिणे ॥ इति ।

♦ **पतञ्जलिः**

महानन्दनाम्ना महानन्दमयनाम्ना वा भगवतः पतञ्जलेः एकं काव्यं अस्ति इति कृष्णचरिते समुद्रगुप्तो लिखति ।

महानन्दमयं काव्यं योगदर्शनमद्भुतम् ।
योगव्याख्यानभूतं तद् रचितं चित्तदोषहम् ॥ इति

सदुक्तिकर्णामृते यथा–

यद्यपि स्वच्छभावेन दर्शयत्यम्बाधिर्मणिम् ।

तथापि जानुदघ्नेयमिति चेतसि मा कृथा ॥

♦ महाकवि'भट्टिः' (६००-६५० वि० सं०)

काव्यशास्त्रस्य परम्परायां महाकविः भट्टिः सर्वाग्रणीः अस्ति व्याकरणाध्ययनात् भीताः संस्कृतविद्यार्थिनः चिरकालात् भट्टिकाव्यमाध्यमेन संस्कृतव्याकरणं सहजतया पठन्ति।

अस्य कवेः अपूर्वा कृतिः वर्तते भट्टिकाव्यम् । भट्टिकाव्यस्य अस्य अपरं नाम अस्ति रावणवधमहाकाव्यम् । अस्य काव्यस्य माध्यमेन समग्रे अपि भारते संस्कृत-व्याकरण- शिक्षणं वहोः कालात् भवति । रावणवधमहाकाव्यस्य रचना ग्रन्थकारानुसारं श्रीधरसेनस्य राज्यकाले सौराष्ट्रदेशस्य वल्लभीनगर्य्याम् अभवत् । अस्य काव्यस्य आधारः वाल्मीकिरामायणम् अस्ति । रामजन्मनः आरभ्य रामराज्याभिषेकं यावत् रामचरितं वर्णितम् अस्ति अस्मिन् काव्ये। द्वाविंशतिसर्गैः निबद्ध काव्यम् इदम् चतुर्षु काण्डेषु विभक्तमस्ति। चतुर्णां काण्डानां क्रमशः इमानि नामानि सन्ति-

1. प्रकीर्ण-काण्डम् ।
2. अधिकार-काण्डम् ।
3. प्रसन्न-काण्डम् ।
4. तिङन्त-काण्डम् ।

अस्य काव्यस्य विषये विद्वत्सु एषा धारणा अस्ति यत् अयं भट्टिः श्रीभर्तृहरिरेव भवति । मल्लिनाथः भर्तृहरिकर्तृकं काव्यं स्वीकरोति ।

♦ भट्ट भूमः/भट्ट-भौमः/भूमकः

लक्ष्य-प्रधानं काव्यशास्त्रं विकसयितुं भट्टभूमस्य अपि नाम सादरं स्मर्यते संस्कृतानुरागिभिः विद्वद्भिः । अस्य विदुषः कवेः नाम्नः काव्यस्य च विषये विद्वत्सु मतान्तरं दृश्यते । केचन विद्वांसः अस्य कवेः रचनां ''रावणार्जुनीयम्'' वदन्ति केचन च ''अर्जुनरावणीयम्'' । इदं काव्यं सप्तविंशतिसर्गैः निबद्धम् अस्ति । कार्तवीर्यस्य रावणस्य च युद्धप्रसङ्गः वर्णितः अस्ति अत्र । अस्य काव्यस्य प्रमुखं वैशिष्ट्यम् इदम् अस्ति यत् अष्टाध्यायीसूत्राणां यथाक्रमम् उदाहरणं प्रस्तुतम् अस्ति । एतत् काव्यं बलाहरपरिसरस्थेन विजयपालशास्त्रिणां समीक्ष्य प्रकाशितम्, अत्र छात्रैः अनेकानि शोधकार्याणि क्रियन्ते ।

♦ हेमचन्द्रः (११४५-१२२९ वि०)

लक्ष्य-प्रधान-काव्य-कारेषु हेमचन्द्राचार्यनामा कविः ''कुमारपालितचरितम्'' लिखितवान्। अस्मिन् काव्ये चालुक्य-वंशोद्भवस्य राज्ञः कुमारपालस्य चरितं वर्णितमस्ति । एतत् काव्यं द्व्याश्रयकाव्यम् अस्ति यतोहि अस्मिन् आदौ विंशति-सर्गाः संस्कृतभाषायां निबद्धाः सन्ति । तथा च अन्ते अष्टौ सर्गाः प्राकृतभाषायां निबद्धाः सन्ति ।

♦ वासुदेवः (१६०० ई०)

वासुदेव-कविना विरचितं वासुदेवविजयं नाम काव्यं लघुकलेवरम् अपि वैदुष्यपूर्णम् अस्ति । अनेन विदुषा रावणार्जुनीयस्य अर्जुनरावणीयस्य वा काव्यस्य एका टीकापि लिखिता अस्ति । इयं टीका मद्रास-प्रदेशस्य राजकीय हस्तलेख संग्रहालये सुरक्षिता अस्ति हस्तलेखस्य अस्य आदिपाठः एवम् अस्ति ।

वासुदेवैकमनसा वासुदेवेन निर्मितम् ।
वासुदेवीयटीकां तां वासुदेवोऽनुमन्यताम् ॥

अन्ते च एवं लिखितमस्ति- इति अर्जुनरावणीये रषाभ्यां पादे इति अर्जुनरावणीये समाप्तम् । कवेः अस्य जन्मसमयः 1600 ई० अस्ति ।

- **मल्लिनाथः**

मल्लिनाथः न्यासस्य ''न्यासोद्योत'' नाम्नीं टीकाम् अलिखत् । अयं टीकाकारः मल्लिनाथः किरातार्जुनीयमहाकाव्यस्य कुमारसम्भवमहाकाव्यस्य रघुवंशमहाकाव्यस्य अन्येषां च अनेकेषां महाकाव्यानां खण्डकाव्यानां च टीकां लिखितवान् ।

- **हलायुधः**

हलायुधः विदुषा अपि कविरहस्यनामकम् एकं लक्ष्यप्रधानकाव्यं रचितम् । अस्य काव्यस्य कविगुह्यम् इत्यपि नाम ।

- **नारायणः**

अनेन विदुषा सुभद्राहरणनामकं काव्यरचितम् ।

- **नारायणकविः**

अस्य रचना धातुकाव्यम् अस्ति । एवं प्रकारेण अनेके विद्वांसः स्व स्व प्रतिभावलेन लक्ष्यप्रधानं काव्यं रचितवन्तः इति ।

बोधप्रश्नाः

1. लक्ष्यप्रधानव्याकरणस्य किं प्रयोजनम् ?

....

.... ।

2. 'जाम्बवतीविजयम्' इत्यस्य कः कर्ता ?

....

....।

3. रावणवधमहाकाव्यम् अस्य अपरं नाम किम् ?

....।

१४.४ निरुक्तस्य इतिहासात्मकः संक्षिप्तपरिचयः

अर्थमाश्रित्य शब्दस्य व्याकरणनिरपेक्षमपि निर्वचनं यद्विद्यते तन्निरुक्तम् । तथाहि- अर्थावबोधे निरपेक्षतया पदजातं निरुक्तं भवति । निरुक्तस्य व्याख्यानं पतञ्जलेः प्रागेव प्रारब्धमासीत् । यथा भगवान् पतञ्जलिः लिखति-

शब्दग्रन्थेषु चैषा प्रसृततरा गतिर्भवति । निरक्तं व्याख्यायते व्याकरणं व्याख्यायते इत्युच्यते । न कश्चिदाह पाटलिपुत्रं व्याख्यायते इति । अर्थात् शब्दग्रन्थेषु एव व्याख्या प्रवृत्ता भवति । निरुक्तशब्दस्य व्युत्पत्तिः एवं भवति निर् उपसर्गपूर्वकवच्धातोः क्त प्रत्यये कृते सति निरुक्तशब्दः सिद्धयति । आचार्यदुर्गानुसारम्- निष्कृष्य=विगृह्य वचनम्= निर्वचनम्। निरुक्तविषये अयं श्लोकः द्रष्टव्यः अस्ति-

वर्णागमो वर्णविपर्ययश्च दौ चापरौ वर्णविकारनाशौ ।
धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम् ॥

निरुक्तस्य विषय: शब्दशास्त्रीयनिर्ववचम् अस्ति । वेदार्थज्ञानस्य सरलतया बोधनाय निरुक्तस्य रचना जाता । महर्षि: यास्क: वैदिकदेवता-तत्त्वानां स्पष्टीकरणाय निरुक्तं प्रोक्तवान्। इत्थं वयं अवलोकयाम: यत् निरुक्ते द्वौ विषयौ प्रामुख्येन वर्णितौ स्त: । क-मन्त्रार्थज्ञानम् ख-देवविद्या। मन्त्रार्थज्ञानप्रकरणे निघण्टु-ग्रन्थे ये मन्त्रा: मन्त्रांशा: वा उद्धृता: सन्ति तेषां स्पष्टप्रतिपादनं कृतवान् अस्ति यास्क: । यद्यपि मन्त्रव्याख्याने दृष्टिभेदेन अर्थभेद: भवति, किन्तु निष्कर्ष: क: इति प्रतिपादित: अस्ति ।

बोधप्रश्ना:

4. निरुक्तं किं भवति ?

....

....।

5. निरुक्तस्य रचनाया: किं फलम् ?

....

....।

१४.५ शिक्षाग्रन्थानाम् इतिहासात्मक: संक्षिप्त: परिचय:

शिक्षा व्याकरणं छन्दो निरुक्तं ज्योतिषं तथा ।
कल्पश्चेति षडङ्गानि वेदस्याहुर्मनीषिण: ॥

इमानि सन्ति शिक्षाव्याकरणादीनि वेदस्य अङ्गानि । एतेषां सर्वेषां वेदाङ्गानां निष्कारणम् अध्ययनं कर्तव्यम् इति वदति व्याकरणमहाभाष्यप्रणेता भगवान् पतञ्जलि: ।

ब्राह्मणेन निष्कारणो धर्म: षडङ्गो वेदोऽध्यायो ज्ञेयश्च। पाणिनीयशिक्षाकार: ब्रवीति यत्-

छन्द: पादौ तु वेदस्य, हस्तौ कल्पोऽय पठ्यते ।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥

शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।
तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥

यथा शरीरे नासिका उन्नतं स्थानं प्राप्तवती अस्ति तथैव शिक्षया: अपि वेदाङ्गेषु उन्नतं स्थानम् अस्ति ।

- **शिक्षाशब्दस्य व्युत्पत्ति:**

आचार्यस्य सायणस्य मतानुसारं स्वरवर्णाद्युच्चारणप्रकारो यत्र शिक्ष्यते सा शिक्षा । अर्थात् उदात्तानुदात्तस्वरितस्वराणां तथा वर्णानाम् अन्येषां उच्चारणविधि: यत्र वर्णित: अस्ति तत् शास्त्रम् शिक्षाशास्त्रम् । आचार्य: विष्णुमित्र: ऋग्वेदप्रातिशाख्य- व्याख्यायां कथयति- शिक्षा स्वरवर्णोच्चारणोपदेशकं शास्त्रम् । शिक्ष् अभ्यासे इत्यस्माद्धातो: ''गुरोश्चहल:'' इति सूत्रेण अप्रत्यये कृते पुन: स्त्रीत्वविवक्षायां टाप्प्रत्यये च कृते शिक्षाशब्दस्य निष्पत्ति: भवति।

अस्य शिक्षाशब्दस्य अर्थः शिक्षणं शिक्षा भवति। एवमेव ''शक्लृ'' गतौ ''शक्'' मर्षणे इत्यस्मात् धातोः अपि शिक्षाशब्दस्य निष्पत्तिः भवति । पण्डितगोपालशास्त्री नेने महोदयः लिखति यत्-उदात्तानुदात्तस्वरितप्रचयाख्यस्वर-ह्रस्व-दीर्घ-प्लुतानुनासिकाननु-नासिकादि-भेदभिन्नवर्णसमुदायात्मकपदोच्चारणप्रकारकबोधको ग्रन्थविशेषः । तात्पर्यम् इदं यत् चतुर्षु वेदेषु स्वरादिवर्णानां कथम्-उच्चारणं भवेत् इत्येव नियमयितुं शिक्षाग्रन्थानां प्रणयनमभवत् ।

- **शिक्षा-वेदाङ्गस्य प्रवक्ता**

संस्कृत वाङ्मये समस्त-विद्यानाम् आदिप्रवक्ता ब्रह्मा अस्ति इति स्वीक्रियते । अत एव ऋक्तन्त्रे विद्या-परम्परायाः विषये उल्लिखितमस्ति-

ब्रह्मा वृहस्पतये प्रोवाच, वृहस्पतिरिन्द्रायेन्द्रो ।
भरद्वाजाय, भरद्वाजः ऋषिभ्यः, ऋषयः ब्राह्मणेभ्यः ॥ (ऋक्तन्त्रे)

एतेन सिद्ध्यति यत् अक्षरसमान्नायस्य प्रथमोपदेशकः ब्रह्मा अस्ति । ब्रह्मा बृहस्पतये अक्षरसमाम्नायं प्रोवाच । बृहस्पतिः अयं देवानां पुरोहितः अस्ति। बृहस्पतिर्वै देवनां पुरोहितः । (ऐः ब्राह्मणे)पुनः बृहस्पतिः इन्द्राय वेदाङ्गानि उपदिदेश ।

बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां
शब्दानां शब्दपारायणं प्रोवाच.... ।(व्याकरणमहाभाष्ये)

इन्द्रः भरद्वाजाय प्रोक्तवान् । अयं भरद्वाजः देवपुरोहितस्य वृहस्पतेः पुत्रः अस्ति । अस्य भरद्वाजस्य एकादशपुत्राः आसन् । किन्तु ऋग्वेदस्य सर्वानुक्रमण्यां भरद्वाजस्य दशपुत्राणाम् उल्लेखः अस्ति । एतेषु नवपुत्राः ऋजिष्वा गर्गः नरः वायुः वसुः शासः, शिरिम्बिष्ठः, शुनहोत्रः, सुहोत्रः इत्यादयः मन्त्रद्रष्टारः आसन् । रात्रिनाम्नी एका कन्या अपि आसीत् या मन्त्रदष्ट्री आसीत् । अस्य भरद्वाजस्य स्थितिकालः महाभारतात् 400 वर्षपूर्वम् आसीत् । किन्तु "भरद्वाज-शिक्षा-ग्रन्थस्य आधुनिकत्वात् इतिहासकाराः" इमं ग्रन्थम् अर्वाचीनं मन्यन्ते।

- **ऋग्वेदीय-शिक्षाग्रन्थाः**

१- शैशिरीयशिक्षा

ऋग्वेदस्य शैशिरीयशाखया सम्बन्धितः अयं शिक्षाग्रन्थः अस्ति । अस्मिन् ग्रन्थे 360 कारिका सन्ति । अस्य प्रतिपाद्यविषयः वर्णोच्चारणस्थानं, करणं, प्रयत्नश्च अस्ति । अस्मिन् वेदमन्त्राणाम् अध्येतुः गुणदोषाः सविस्तरं वर्णिताः सन्ति ।

२- शौनकीय-शिक्षा

अस्मिन् शिक्षाग्रन्थे उदात्तादिभेदपूर्वकवर्णोच्चारणसम्बन्धिताः विषयाः वर्णिताः सन्ति। विवृत्ति- स्वरभक्ति-यम-रङ्गादिसम्बन्धिताः विषयाः सोदाहरणं स्पष्टतया वर्णिताः सन्ति ।

३- स्वरव्यञ्जनशिक्षा

कारिकारूपेण निबद्धे अस्मिन् ग्रन्थे अक्षरसमाम्नायान्तर्गताः ये स्वरव्यञ्जनाः वर्णाः सन्ति तेषां भाषावैज्ञानिकदृष्ट्या विवेचनम् अस्ति । अस्मिन् ग्रन्थे ऋग्वेदप्रातिशाख्यस्य नियमाः वर्णिताः सन्ति ।

४- शमानशिक्षा

सूत्रशैल्यां निबद्धः अयं ग्रन्थः ऋग्वेदसंहितायाः विसर्जनीयप्रकरणं तनुते ।

♦ यजुर्वेदीयशिक्षाग्रन्थाः

१- चारणीय-शिक्षा

अस्य शिक्षाग्रन्थस्य नाम च महाशिक्षा अपि अस्ति । किन्तु शाखाविशेषेण सम्बन्धित्वात् ग्रन्थः अयं चारणीयशिक्षानाम्ना ज्ञातः अस्ति । ग्रन्थस्य लेखकः चारायणाचार्यः अस्ति । इदानीं ग्रन्थः अयम् अनुपलब्धः अस्ति ।

२- भारद्वाज-शिक्षा

चतुर्वेदाध्यायी भारद्वाजः 130 कारिकाभिः वर्णोच्चारण-सम्बन्धिशङ्कानां समाधानं कृतवान् अस्ति अस्मिन् ग्रन्थे । अस्य कालः वि० पूर्व 3000 वर्ष अस्ति ।

३- व्यासशिक्षा

महर्षिः व्यासः अष्टाविंशतिप्रकरणेषु इमं ग्रन्थम् उपनिबद्धवान्। प्रथमं प्रकरणम् अत्र संज्ञाप्रकरणमस्ति । द्वितीयप्रकरणे प्रग्रहस्वराः वर्णिताः सन्ति । तृतीयं परिभाषाप्रकरणम् । एवमेव व्याकरणस्य समे नियमाः अत्र वर्णिताः सन्ति।

४- शम्भुशिक्षा

अस्मिन् ग्रन्थे मन्त्राणां क्रमावसानविषयाः वर्णिताः सन्ति । डॉ कीलहार्न- महोदयानुसारं अयं ग्रन्थः पाणिनीयशिक्षायाः रूपान्तरितः अस्ति ।

५- कौहलीय शिक्षा

79 कारिकाभिः उपनिबद्धे अस्मिन् ग्रन्थे मन्त्रोच्चारणेन सह हस्तसञ्चालनं वर्णितमस्ति। प्रकृतग्रन्थे वर्ण्य-विषयः व्यासशिक्षा अस्ति ।

६- बौधायनशिक्षा

अनुपलब्धोऽस्ति अयं शिक्षाग्रन्थः । किन्तु वेदलक्षणानुक्रमण्याम् अस्य उल्लेखः अस्ति ।

७- वाशिष्ठी शिक्षा

अद्यावधि-अप्रकाशितस्य अस्य शिक्षाग्रन्थस्य एकां कारिकां तैत्तिरीय-प्रातिशाख्यस्य भाष्यकारः गार्ग्यगोपालयज्वा उद्धृतवान् अस्ति ।

♦ वाल्मीकि एवं हारीत-शिक्षा

शिक्षाद्वयशास्त्रम् अनुपलब्धमस्ति अद्यावधि। परन्तु अस्य उल्लेखः वेदलक्षणानुक्रमण्यां मिलति।

♦ आरण्यशिक्षा

स्वरादिवर्णाः अत्रापि विशदीकृताः सन्ति। अस्य ग्रन्थस्य विषये एवम् उच्यते-

क्षितिसुरगणहेतेरितदारण्यशिक्षामृतमिवनवशिक्षावारिधेरुद्धरामि। अर्थात् अयं ग्रन्थः समुद्रमथनात् निःसृतम् अमृतमिव अस्ति।

- **यजुर्वेदीय - शिक्षाग्रन्थाः**

याज्ञवल्क्य-शिक्षा

अयं शिक्षाग्रन्थः गद्यात्मकंः पद्यात्मकश्च अस्ति पूर्वार्द्ध-उत्तरार्द्धभेदेन विभक्तः अस्ति। पूर्वार्द्धे द्वादशमन्त्राः उत्तरार्द्धे च 121 रामन्ताः सन्ति । ललिताप्रसाद उवरवाल-महोदयः अस्य ग्रन्थस्य उपरि शिक्षावल्ली नाम्नीं टीकां लिखितवान् अस्ति ।

विशिष्ठी शिक्षा

वशिष्ठने ऋषिणा कृतोऽयं ग्रन्थः यजुर्वेदस्य माध्यन्दिनशाखया सम्वन्धितोऽस्ति । अत्र चत्वारिंशत् खण्डाः सन्ति ।

अथ शिक्षां प्रवक्ष्यामि वासिष्ठस्य मतं यथा ।
सर्वानुक्रमयुद्धृत्य ऋग्यजुषोस्तु लक्षणम् ॥

- **अन्ये शिक्षाग्रन्थाः**

एवमेव बहवः शिक्षाग्रन्थाः यजुर्वेदेन सम्बद्धाः सन्ति, तेषां केचन नामानि दीयन्ते-

1. कात्यायनी-शिक्षा
2. पाराशरी-शिक्षा
3. माण्डवी-शिक्षा
4. अमोघानन्दिनी शिक्षा
5. माध्यन्दिनशिक्षा
6. वर्णरत्नप्रदीपिका-शिक्षा
7. केशवी-शिक्षा
8. मल्लशर्म-शिक्षा
9. षोडशश्लोकी शिक्षा
10. अवसाननिर्णय-शिक्षा
11. स्वरभक्तिलक्षणपरिशिष्टा-शिक्षा
12. क्रमसन्धान-शिक्षा
13. गलदृक् शिक्षा
14. प्रातिशाख्यप्रदीप-शिक्षा
15. यजुर्विधान-शिक्षा
16. स्वराङ्कुश-शिक्षा
17. स्वराष्टक-शिक्षा

- **सामवेदीयशिक्षाग्रन्थाः**

नारदीय-शिक्षा

वेदाङ्ग–रूपेण नारदीय–शिक्षा–ग्रन्थः–सुप्रसिद्धोऽस्ति। अस्य लेखकः नारदः अस्ति । अत्र 2362 श्लोकाः सन्ति । अस्य ग्रन्थस्य एका टीका अस्ति ''शिक्षाविवरणम्'' । टीकाकर्तुः नाम भट्टशोभाकरः अस्ति ।

लोमशीशिक्षा

महर्षिण लोमशेन प्रोक्तः अस्ति अयं शिक्षाग्रन्थः । लोमशीशिक्षान्ते श्लोकद्वयेन ज्ञायते यत् गौतमीशिक्षायाः लोमशीशिक्षायाश्च प्रणयनं पण्डित–युगल–किशोर–पाठकः कृतवान् अस्ति ।

ग्रहवेदाङ्केन्दुयुते इषे मास्यर्जने दले ।
गौतमीलोमशीशिक्षे विहिते सामगे मया ॥

युगलप्राक्किशोरेण पाठकेन दयालुना ।
सामगानां हितार्थाय वेदविद्यालयाङ्किता ॥

गौतमीशिक्षा

सम्प्रति अयं शिक्षाग्रन्थः उपलब्धः अस्ति । गौतमस्य ऋषेः स्मरणं पाणिनिना महाभाष्यकारेण पतञ्जलिना आपिशलिना कृतम् अस्ति ।

- **अथर्ववेदीयः शिक्षाग्रन्थः**

माण्डूकी-शिक्षा

मण्डूकः ऋषिः, तेन लिखिता शिक्षा मण्शूकशिक्षा, ऐतरेये आरण्यके ऋक् प्रातिशाख्ये च मण्डूकपुत्रस्य विमर्शः उपलभ्यते।

- **सामान्य-शिक्षा**

पाणिनिशिक्षा

वेदाङ्गेषु पाणिनीयशिक्षायाः महत्त्वपूर्णं स्थानम् अस्ति । वर्णोच्चारणस्य शुद्धतायै महर्षिः पाणिनिः शिक्षाग्रन्थं प्रोक्तवान् । पाणिनिमुनेः वर्णोच्चारण–शिक्षा–सम्बन्धि–सूत्रान् आत्मसात्कर्तुं पिङ्गलाचार्येण पाणिनि–शिक्षा–ग्रन्थः व्यरचि । अयं शिक्षाग्रन्थः श्लोकात्मकः अस्ति। पाणिनि–शिक्षायाः व्याख्यारूपे शिक्षाप्रकाशे लिखितमस्ति यत्–

ज्येष्ठभ्रातृभिर्विहिते व्याकरणेऽनुजस्तत्र भगवान् पिङ्गलाचार्यः तन्मतमनुभाव्य शिक्षां वक्तुं प्रतिजानीते ।

पाणिनीयशिक्षा पाणिनेः एव अस्ति अत्र प्रमाणमिदम्–

येनाक्षरसमाम्नायमधिगम्यमहेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥

येन धौताः गिरः पुंसां विमलैः शब्दवारिभिः ।
तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः ॥

अज्ञानान्धस्य लोकस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै पाणिनये नमः ॥

आपिशलि-शिक्षा

आपिशलि–शिक्षायाः द्वौ हस्तलेखौ आडियार– पुस्तकालये चैन्नैस्थे सुरक्षितौ स्तः ।

चान्द्रशिक्षा

''चान्द्र-वर्ण-सूत्रं'' नाम्नी चान्द्रशिक्षा अस्ति । अस्यां 51 सूत्राणि सन्ति ।

बोधप्रश्नाः

6. शक्षा शब्दस्य का व्युत्पत्तिः भवति ?

....

.... ।

7. शौनकीय शिक्षा केन वेदेन सम्बद्धा ?

....

.... ।

१४.६ पाणिनीयव्याकरणस्य अध्ययनपरम्परा

एतावत् पर्यन्तं भवान् ज्ञातवान् यत् पाणिनीयं व्याकरणं सर्वाङ्गपूर्णम् अधुना सर्वत्र पठनपाठनादिषु प्रचलति । तत्र भगवता पाणिना पञ्चाङ्गपूर्णानि व्याकरणसूत्राणि रचितानि । तान्येव सूत्राण्याधारीकृत्य मुनिना कात्यायनेन वार्तिकानि, पतञ्जलिना महाभाष्यं च रचितम् । अनन्तरं वृत्तिग्रन्थानां काशिकाप्रभृतीनां रचना जाता । वृत्तिग्रन्थानां काशिकादीनाञ्च व्याख्यानग्रन्थानां रचना जाता । पुनश्च प्रक्रियाग्रन्थानां तासां टीकानाञ्च रचना जाता । ताः सर्वाः रचनाः आश्रित्य इदानीं पठनपाठनं सर्वत्र गुरुकुले महाविद्यालये वा प्रचलति । तदिदं पठनपाठनं द्विधेदानीं विभक्तं प्राचीनपरम्परायां नवीनपरम्परायाञ्च । तत्र का प्राचीनपरम्परा, का च नवीनपरम्परेति विषये अग्रे जानातु ।

- **प्राचीनव्याकरणपरम्परा**

यत्र अष्टाध्यायीक्रमानुसारं व्याख्यानं भवति, तदध्यापनं प्राचीनपरम्परायाम् आगच्छति। महाभाष्यं काशिका भाषावृत्त्यादिकं प्रथमावृत्तिः अत्र परम्परायाः पाठ्यन्ते एतदनुसारेणैव परीक्षा अपि भवति । प्राचीनव्याकरणपरीक्षा, अत्र प्रथमातः आचार्यकक्षां यावत् सर्वत्र प्राचीनग्रन्थानामेव प्रचलनं भवति । वाक्यपदीयम्, महाभाष्यं वा आकरग्रन्थः भवति । उभयत्र परम्परायां स्वीक्रियते । तत्रैतावान् विशेषः यत् नव्यव्याकरणपरमपरायां कश्चनांश एव महाभाष्यादेः पठ्यते कस्मिंश्चित् एकस्मिन् पत्रे । प्राचीनपरम्परायां सर्वाणि पत्राणि, प्रचीनपरम्परायामेव पठ्यन्ते । अत्र परम्परायां काशिकावृत्तेः सर्वोत्कृष्टं स्थानं भवति वृत्तिग्रन्थेषु। अत्र सम्पूर्णा काशिका न्यासपदमञ्जरीसहिता अध्याप्यते । प्रायः गुरूकुलेषु प्राचीनपरमपरैव प्रचलति । अस्यां परम्परायां सर्वप्रथमम् अष्टाध्यायी छात्रैः अभ्यसनीया भवति। तत्र अष्टाध्यायीमाश्रित्य एव च वृत्तिकरणाय छात्राः बोध्यन्ते, प्रशिक्षिताः क्रियन्ते । यद्यपि अस्यां परम्परायां जनानां अष्टाध्याय्याः अर्थकरणे छात्राणां प्रौढं ज्ञानं भवति, अथापि अत्र महान् कालः अपेक्ष्यते । किञ्च अस्यां परम्परायां न्यायशैल्या प्रवेशो प्रायः नैव भवति, परिष्कारादेः प्रायः आवश्यकता न भवति । किन्तु पाणिनेः मूलपरम्परायाः ज्ञानम् अत्र समीचीनतया सुरक्षितं भवति । सर्वेषां सूत्राणां सामान्यः अर्थः, अग्रे च महाभाष्यस्यापि अस्यां परम्परायाम् आधिक्येन ज्ञानं भवति छात्राणां विदुषाञ्चेति जानातु ।

♦ नव्यव्याकरणपरम्परा

पूर्वं भवान् प्राचीनव्याकरणपरम्पराविषये ज्ञातवान् । इदानीं नव्यव्याकरणपरम्परा विषये जानातु । नव्यपरम्परायां प्राय: प्रक्रिया: ग्रन्था: पाठ्यन्ते । तत्रापि भट्टोजिदीक्षितारभ्य नव्यव्याकरणपरम्परा स्वीक्रियते प्राय: विद्वद्भि: । श्रीमता भट्टोजिदीक्षितेन वैयाकरणसिद्धन्तकौमुदी नाम्नी प्रक्रियाग्रन्थ: लिखित:, यत्र च सर्वाण्यपि लौकिकवैदिकसाधारणानि सूत्राणि तत्तत्प्रकरणानुसारं व्याख्यातानि। मध्ये मध्ये अतिगूढं विचारम् उपस्थापयितुं फक्किकानां समावेश: कृतो भवति । तादृक् गूढरहस्य विचाराय पश्चाद्भाविन: विद्वांस: अतिमहान्तं विचारं कृतवन्त: । अत एव च सिद्धान्तकौमुदीग्रन्थयोजनाय भट्टोजिदीक्षितेन स्वयमेव प्रौढमनोरमा नाम्नी व्याख्या कृता। प्रौढमनोरमायाश्च व्याख्यानं हरिदीक्षितेन लघुशब्दरत्नादिरूपेण कृतम् । अथ च नागेशभट्ट: लघुशब्देन्दुशेखरं, बृहच्छब्देन्दुशेखरं च कृतवान् । शेखरस्यापि च महती टीका: कृता: विद्वद्भि: । सोऽयं महान् वंशवृक्ष: नव्यव्याकरणपरम्पराया: ।

अत्र परम्परायां च लघुसिद्धान्तकौमुदी भवति प्रारम्भिक: ग्रन्थ: । अत्राऽपि सिद्धन्तकौमुदीवत्, प्रक्रियासाधनाय एव सूत्राणां व्याख्या भवति । अनन्तरं मध्यमायां कक्षायां वैयाकरणसिद्धन्तकौमुद्या:, पाठनं भवति, अत्रैव च प्रौढमनोरमाशब्दरत्नादीनां, बालमनोरमातत्त्वबोधिन्यादीनां च पठनपाठनं भवति, आचार्यकक्षायाञ्च लघुशब्देन्दुशेखरादीनां मञ्जूषावैयाकरणभूषणादीनाञ्च अध्यापनं भवति ।

भट्टोजिदीक्षितानन्तरं श्रीरामकृष्णभट्ट: महान् वैयाकरण: संजात:, येन सिद्धान्तकौमुद्या:, सिद्धान्तरत्नाकरनाम्नी महती टीका लिखिता । इयमेव टीका मन्ये भट्टनागेशस्यापि पथप्रदर्शनमकरोत् असावपि, भट्टोजिदीक्षितस्य कृते नव्यशब्दव्यवहारं करोति ।

एवञ्च भट्टोजिदीक्षितं प्रारभ्य नागेशपर्यन्तं ये विद्वांस: प्रक्रियाधारेण व्याख्यानं कृतवन्त: ते सर्वे नव्यवैयाकरणा: भवन्ति, तत्रापि, इदानीं नागेशस्य नव्यवैयाकरणेषु मुख्यता भवति ।

अत्र परम्परायाम् इदानीं वैयाकरणसिद्धान्तकौमुद्यानुसारं पठनपाठने भवत: । अत्र प्राचीनापेक्षया अधिकतया गूढतत्त्वानां विचारो भवति, यत्र तत्र च प्राचीनानां खण्डनमपि भवति । अत्र परम्परायां कानिचित् प्रकरणानि अपि अधीत्य छात्र: वाक्पटु: भवितुमर्हति– अल्पेन समयेन इति ।

बोधप्रश्ना:

8. नव्यवैयाकरणेषु मुख्यता इदानीं कस्य आचार्यस्य भवति ?

....

....।

9. इदानीं नव्यव्याकरणपरम्परा कुत: आरभ्य स्वीक्रियते ?

....

....।

10. व्याकरणस्य पठनपाठनपरम्परा कतिविधा भवति ?

....

....।

14.4 सारांशः

अस्मिन् अन्तिमे पाठे भवान् ज्ञातवान् यत् एतादृशम् अपि काव्यं भवति येन व्याकरणस्य पठनं शिक्षणं वा भवितुमर्हति । एतादृशं काव्यं भवति, पाणिनिरचितं 'पातालविजयम्' इत्याख्यं काव्यम्, अथ च भट्टिलिखितं भट्टिकाव्यम् । एवमन्यान्यपि एतादृशानि काव्यानि भवन्ति । पुनश्च निरुक्तविषये निरुक्तकारविषये च ज्ञातवान् यत् निरुक्तं व्याकरणनिरपेक्षमेव शब्दार्थं शब्दनिर्वचनं वा करोति । शिक्षाग्रन्थविषये ज्ञातवान् यत् प्रतिवेदं शिक्षाग्रन्थाः भवन्ति। शिक्षाग्रन्थानां परम ं प्रयोजनं स्वरवर्णोच्चारणादिशिक्षणम् । अन्ते च भवान् ज्ञातवान् यत् व्याकरणस्य द्विविधा परम्परा भवति प्राचीनपरम्परा नव्यपरम्परा च । तत्र च अद्यत्वे अधिकतया नवीनपरम्परा प्रचलति, अत्र च भट्टोजिदीक्षितमारभ्य नागेशभट्टं यावत् नवीनपरम्परा भवति इति।

14.5 शब्दावली

लक्ष्यप्रधानकाव्यम् – लक्ष्यं व्याकरणं, तत् प्रधानं यस्मिन् तत्- व्याकरणतत्वावबोधकं काव्यम् ।

व्याकरणम् – व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेन तत् अथवा- व्याक्रियते यत् तत् व्याकरणं लक्ष्यम् ।

काव्यम् – कवेर्भावः, कर्म वा काव्यम् ।

14.6 बोधप्रश्नोत्तराणि

1. लक्ष्यप्रधानकाव्यस्य परमं प्रयोजनं व्याकरणशिक्षणम् ।
2. 'जाम्बवतीविजयम्' इत्यस्य कर्ता महर्षिः पाणिनिः भवति ।
3. रावणवधमहाकाव्यस्य अपरं नाम भट्टिकाव्यं भवति ।
4. अर्थमाश्रित्य शब्दस्य व्याकरणनिरपेक्षमपि निर्वचनं निरुक्तम् ।
5. निरुक्तरचनायाः फलं वेदार्थज्ञानस्य सारल्येन बोधनम् ।
6. शिक्षाशब्दस्य व्युत्पत्तिः- स्वरवर्णाद्युच्चारं शिक्ष्यते अनया सा शिक्षा । अत्र शिक्ष् धातोः 'गुरोश्च हलः' इति अप्रत्यये स्त्रीत्वविवक्षायां टापि रूपम् ।
7. शौनकीयशिक्षात्रृग्वेदेन सम्बद्धा ।
8. नव्यव्याकरणेषु इदानीं मुख्यता आचार्यस्य नागेशभट्टस्य भवति।
9. इदानीं नव्यव्याकरणपरम्परा भट्टोजिदीक्षितं समारभ्य स्वीक्रियते ।
10. द्विविधा पठनपाठनपरम्परा प्रचलति। प्राचीनव्याकरणापरम्परा नवीनव्याकरणपरम्परा च ।

14.7 सन्दर्भग्रन्थः

व्याकरणशास्त्रस्येतिहासः

14.8 सहायकग्रन्थाः

१. व्याकरणशास्त्र का इतिहास पं. युधिष्ठिरमीमांसकः ।

२. व्याकरणशास्त्रेतिहासविमर्शः– डा. अशोकचन्द्रगौडः श्रृङ्गेरी।

३. व्याकरणशास्त्रेतिहासः– लोकमणिदहालः।

४. वैयाकरणसिद्धान्तकौमुदी– भट्टोजिदीक्षितः।

14.9 अभ्यासप्रश्नाः

क. लघूत्तरीयप्रश्नाः

१. द्वयोः लक्ष्यप्रधानकाव्ययोः निर्देश्यं करोतु ।

....

....।

२. स्वर्गारोहणकाव्यस्य कः कर्ता ?

....।

३. वेदस्य कानि षडङ्गानि सन्ति ?

....

....

४. एकां सामान्यशिक्षां लिखतु ।

....।

ख. दीर्घोत्तरीयप्रश्नाः

१. लक्ष्यप्रधानकाव्यम् अधिकृत्य एकः लघुनिबन्धः लेख्यः ।

२. 'व्याकरणपरम्परा' एनमाश्रित्य दशवाक्यात्मकः निबन्धः लेख्यः ।